Library IIAS, Shimla
S 294.181 4 C 392.I N-C 392.II
00112394

Calcutta Sanskrit College Research Series. No. CXXXV.

*Published under the auspices of the Government of West Bengal*

**Text No : 40**

53

# NĀRADASMṚTI

**(The Institutes of Nārada)**

The text along with English translation and the commentaries of Asahāya, Bhāvasvāmī and the *Nāradasmṛtitattvaprakāśikā* by the editor,

PART II

*Edited by*

**Dr HERAMBA CHATTERJEE ŚĀSTRĪ**

M.A. (Triple), P.R.S., Ph.D (Calcutta),
D.Phil (Oxon), D.Sc (Budapest),
Professor of Smṛti and Purāṇa,
Department of Post-Graduate Training and Research,
Government Sanskrit College,
Calcutta.

S
294.181 4
C 392.I N-C
392.II

S
294.1814
C 392.II N

संस्कृत कलेज
कलिकाता · १८२४

SANSKRIT COLLEGE
CALCUTTA
1989

**Calcutta Sanskrit College Research Series. No. CXXXV.**

*Published under the auspices of the*
*Government of West Bengal*

**Text No : 40**

# NĀRADASMṚTI

## (The Institutes of Nārada)

The text along with English translation and the commentaries of Asahāya, Bhāvasvāmī and the *Nāradasmṛtitattvaprakāśikā* by the editor,

PART II

*Edited by*

**Dr HERAMBA CHATTERJEE ŚĀSTRĪ**

M.A. (Triple), P.R.S., Ph.D (Calcutta),
D.Phil (Oxon), D.Sc (Budapest),
Professor of Smṛti and Purāṇa,
Department of Post-Graduate Training and Research,
Government Sanskrit College,
Calcutta.

SANSKRIT COLLEGE
CALCUTTA
1989

*Published by* :
Principal, Sanskrit College,
1, Bankim Chatterjee Street,
Calcutta-700 073

*Board of Editors* :

Professor Gopinath Bhattacharya, M.A. P.R.S
Dr. Rabindra Kumar Das Gupta, M.A , Ph.D.
Dr. Kali Kumar Dutta Śāstrī, M.A., Ph.D, Sāmkhya-Purāṇaśāstrī.
Dr. Narayan Chandra Bhattacharya, M.A., P.R.S., Ph.D
Secretary and General Editor.

Indian Institute of Advanced Study
112394
16/10/003
SHIMLA

S
294.1814
C 392.II N

Price : Rs. 35/- only.

Library IIAS, Shimla
S 294.181 4 C 392.I N-C 392.II
00112394

*Printed by* :

Suresh Datta,
Modern Printers,
12, Ultadanga Main Road,
Calçuatt-700 067,

# FOREWORD

Dr. N. C. Bhattacharya,
M.A., P.R.S, Ph.D,
Officer-in-charge,
Sanskrit College, Calcutta,
and General Editor of the Series.

I have the pleasure to announce the publication of the Nāradasmṛti, which will be comprised of two parts, the first of which (the Text) will be followed by the second part—the edited text, commentary and notes. This very difficult and most important text of Dharmaśāstra was first edited by Professor J. Jolly. Professor Heramba Chatterjee Śāstrī, Professor of Smṛti and Purāṇa of the Department of Post-Graduate Training and Research, Government Sanskrit College, Calcutta, has devoted his energies to the improvement of the text. I believe, this publication will be accepted in right spirit by the academic world.

Sanskrit College,
Calcutta.
21.1.89,

N. C. Bhattacharya
General Editor.

## PREFATORY NOTE

Of all the *Dharmaśāstras* the text by Nārada is regarded as the most difficult one in view of the fact that the text is full of complexitities, specially in respect of the corectness of the verses and even of chapters. Throughout the country in almost all the Libraries containing Sanskrit manuscripts, a copy of the manuscript of the *Nāradasmṛti* may be traced with variants of readings in total verses, several words and even in certain cases disputes arise regarding the genuineness or otherwise of certain chapters. A very good number of verses of this *Smṛti* tally fully or partly with those of the *Manusmṛti*. There was a short version as also the longer one. Even the introductory prose portion of the text is absent in many manuscripts. A Nepalese manuscript presents several new features. These contribute to the complexities for the editing of the text. One interesting point adding more problems to the already existing one, is that in the *Agnipurāṇa* in the context of *Vyavahāra*, verses occur which though without mention of the name of the author, are the same as those of Nārada and the readings offer problems of intricate nature. Moreover, the *Smṛti* texts are very rich in the *Vyavahāra* section and the contribution of Nārada in that respect is of top-most value. The commentators of Manu, Yājñavalkya and Viṣṇu in their expositions of the section have made maximum mention of Nārada and in their own way have explained the verses of Nārada. Much more has been done by the Digest-writers (*Nibandhakāras*). Added to these are the incomplete commentary of the *Nāradasmṛti* by Asahāya printed in the edition of the text by J. Jolly in 1886 in the *Bibliotheca Indica* Series. The publication of the *Nārydīyamanusaṃhitā* along with the commentary of Bhavasvāmī in the Trivandrum Sanskrit Series in 1929 is very significant in the sense that herein the number of verses are less than what we find in the edition of Jolly. Keeping all these in view, it has been decided to edit the text along with the commentary of Asahāya, the commentary by Bhavasvāmī, the English rendering of the verses and with an independent commentary providing all the modern and latest information of the verses as far as practicable. In the *Appendix* the informative introductions of edition of the text by Jolly and of the *Nāradīyamanusaṁhitā* by K. Sāmbaśiva Śāstrī have been supplemented. The detailed introduction will be added after the completion of the book in due course. The new commentary is an experiment by itself and the labour will be rewarded if this can inspire other scholars in this field.

Sanskrit College,

1st March, 1989.

Heramba Chatterjee Śāstrī,

## Introductory note on the verses commented on :

The prefatory note by the author (Nārada) in prose presenting information relating to several recensions and abridgements : pp. 1-16.

Verses : 1-2 : Reference to golden age and necessity of the introuction of law-suits (*Vyavahāra*). pp. 17-24.

Verse : 3 : In dispute (for ascertainment) witnesses and documents are regarded as the expedients. pp. 24-25.

Verse : 4 : Legal procedures are of two varieties according as they are attended by a wager (*sottara*) or without the same. pp. 25-26.

Verse : 5 : The fine for a suit conditioned by wager (sottarapaṇa). pp. 26-28.

Verse : 6 : Plaint (*Pratijñā*) as the essential part of the legal proceedings. pp. 28-32.

Verse : 7 : The foundations (*Pratiṣṭhā*) of *Vyavahāra* pp. 32-36.

Verses : 8-9 : Different constituents of *Vyavahāra*. pp. 36-37.

Verses : 10-11 : Four feet (*Catuṣpāt*) of *Vyavahāra*. pp. 37-46.

Verse : 12 : *Vyavahāra* stated to be of four means (*Catuḥsādhana*) and beneficial to the fourfold castes (*Caturhita*). pp. 46-52.

Verse : 13 : *Vyavahāra* concerning with the four categories of persons, namely, the criminals, the witnesses, the members of the court and the king, to the amount of one quarter (pādaśḥ). pp. 53-67.

Verse : 14 : *Vyavahāra*, contributing to fourfold results, namely, *Dharma*, *Artha*, fame and faith. pp. 67-71.

Verse : 15 : *Vyavahāra*, comprised of eight constituents : the king, his officer, the members of the assembly, the law-book, accountant, the scribe, gold, fire and water. pp. 71-80.

---

Appendix-I. containing the *Preface* of the *Nāradasmṛti* by J. Jolly. pp. 1-14

Appendix II. containing the *Introduction* of the *Nāradīya-manusaṁhitā* by K. Sāmbaśiva Śāstrī. pp. 15-18

# नारदस्मृतिः

इह हि भगवान्मनुः प्रथमं सर्वभूतानुग्रहार्थमाचारस्थितिहेतुभूतं शास्त्रं चकार, यत्र लोकसृष्टि र्भूतप्रविभागः सद्देशप्रमाणं पर्षल्लक्षणं वेदवेदाङ्गयज्ञविधानमाचारो व्यवहारः कण्टकशोधनं राजवृत्तं वर्णाश्रमविभागौ विवाहन्यायः स्त्रीपुंसविकल्पो दायानुक्रमः श्राद्धविधानं शौचाचारविकल्पो भक्ष्याभक्ष्यलक्षणं विक्रेयाविक्रेयमीमांसा पातकभेदाः स्वर्गनरकानुदर्शनं प्रायश्चित्तान्युपनिषदो रहस्यस्थानानि । एवं चतुर्विंशतिप्रकरणानि । १ ॥

तदेतदत्र श्लोकशतसहस्रेण साशीतिनाध्यायसहस्रेण च भगवान्मनुरुपनिबध्य देवर्षये नारदाय प्रायच्छत् । स च तस्मादधीत्य महत्त्वान्नायं ग्रन्थः सुकरो मनुष्यैरेव धारयितुमिति द्वादशभिः सहस्रैः संचिक्षेप ; तं च महर्षये मार्कण्डेयाय प्रायच्छत् । २ ॥

स च तस्मादधीत्य तथैवायुःशक्तिमपेक्ष्य मनुष्याणामष्टभिः सहस्रैः संचिक्षेप, तं च सुमतये भार्गवाय प्रायच्छत् । ३ ॥

सुमतिरपि भार्गव स्तस्मादधीत्य तथैवायुर्ह्रासादल्पीयसी शक्ति र्मनुष्याणामिति चतुर्भिः सहस्रैः संचिक्षेप । ४ ॥

तदेतत् पितृमनुष्या ह्यधीयन्ते, विस्तरेण शतसहस्रं देवगन्धर्वादयः । तत्रायमाद्यः श्लोकः,

आसीदिदं तमोभूतं न प्राज्ञायत किंचन ।
ततः स्वयम्भू र्भगवान् प्रादुरासीच्चतुर्मुखः ॥ ५ ॥

इत्येवमधिकृत्य क्रमात् प्रकरणात् प्रकरणमनुक्रान्तम् । तत्र नवमं प्रकरणं व्यवहारो नाम यत्रेमामादौ देवर्षि र्नारदः सूत्रीयां मातृकां चकार । अस्यायमाद्यः श्लोकः । ६ ॥

---

इति ह स्माह भगवान्मनुः प्रजापतिः सर्व° Vulg ; भूतप्रविभागस्तदेश° b.L ; परिषल्लक्षणं Vulg. वर्णधर्माश्रमप्रविभागो Vulg ; दायादानुक्रम Vulg. शौचकल्पो Vulg. स्वर्गकारानुदर्शनम् A ॥१॥

तदेवैच्छ्लोक° B ; तदेतच्छ्लोक° Lb ; श्लोकशतसहस्रमासीत्तेनाध्यायसहस्रेण मनुः प्रजापतिरुपनिबध्य Vulg ; तच्च सुमतये भार्गवाय प्रायच्छत् Vulg ॥२॥

.. तथैवायुर्ह्रासादल्पीयसी मनुष्याणां शक्तिरिति ज्ञात्वा चतुर्भिः सहस्रैः संचिक्षेप । Vulg ॥३॥

Para 4 is omitted in Vulg.

तदेतत् सुमतिकृतं मनुष्या अधीयन्ते Vulg ; यत्रायमाद्यः श्लोको भवति Vulg. ॥५॥

क्रमात्क्रमं प्रकरणात् A. यस्येमां देवर्षि र्नारदः सूत्रस्थानीयां मातृकां चकारेत्यस्याभिमुखम् । Vulg ॥६॥

---

**Eng. Trans.:** Here (in this world) Manu, the divine being, first composed a *Śāstra* (a manual of law), which is the foundation of the established rule of conduct with a view to promote the welfare of all the beings, wherein (have been discussed) twentyfour sections (topics) namely,

creation of the world, the different kinds of living beings, the extent of countries favourable for virtuous persons, the conditions for the constitution of a (judicial) assembly (*pariṣat*) ; performance of sacrificial rituals in accordance with the *Vedas* and the *Vedāṅgas* ; established usage ; forensic law (*vyavahāra*) ; extirpation of the offenders ; the mode of life of a king ; the division of the fourfold castes (*varṇa*) and orders of life (*āśrama*) ; the laws relating to marriage ; mutual rights and relations between the husband and the wife ; the order of succession ; the rules relating to the performance of *śrāddhas* ; elucidation of (difficult) points regarding purification ; the rules regulating the food that is to be taken or not to be taken ; the law regarding commodities that are vendible and that are not saleable ; the different kinds of acts leading to fall from status (*pātaka*) ; details relating to heaven and hell ; expiations ; the *Upaniṣads* ; and the secret doctrines. 1.

Divine Manu by composing that book in verses numbering a hundred thousand and distributing it over one thousand and eighty chapters, delivered it to the divine seer Nārada. After studying from him (Manu), Nārada abridged (the same text) in twelve thousand verses on the consideration that because of its voluminous (great) size (form) such a text cannot be easily mastered by the mortals ; and delivered the same to the great sage Mārkaṇḍeya. 2.

He (Mārkaṇḍeya) after learning from him abridged it (further) to eight thousand verses, considering the (limited) span of life and the capacity of human beings ; and handed it over to Sumati, son of Bhṛgu. 3.

Sumati, the son of Bhṛgu too after having learnt (this book) from him, reduced it to four thousand (verses) considering the fact that capacity of human beings has been lessened through the lessening of life ( in the four ages of the world as outlined in the text of Manu, I, 81-86). 4.

This abridged text is read by the 'Manes and mortals', while the gods, the Gandharvas and other (exalted beings) read the text in extended form consisting of one hundred thousand (verses).

The first verse there is :

This (world) was wrapped up in darkness and nothing was discernible. Then the divine self-born (Being) made his appearance in the form having four faces. 5.

After this exordium in a continuous manner chapter follows chapter. The ninth chapter there is titled as *vyavahāra* (judicial procedure), where the divine seer Nārada prepared an introduction in the style of a *sūtra*, of which the first verse in this : 6.

## असहायकृत-भाष्यम् ।

य: संख्याव्यवहारविस्तरगतौ योऽष्टादशाख्यै: पदै
र्द्वात्रिंशच्छतभेदभिन्नपदकैरुक्तञ्च तन्निर्णय: ।
सोऽस्मिन्नेव महर्षिनारदकृते शास्त्रे परं नापरे
कल्याणोऽवददेतदत्र भुवनेऽप्यर्घ्यं विधायाङ्गुलिम् ।।
दृष्टासहायरचितं नारदभाष्यं कुलेखकैं र्भ्रष्टम् ।
कल्याणेन क्रियते प्राक्तनमेतद्विशोध्य पुन: ।।

तस्मिन् शतसहस्रोपनिबद्धे ग्रन्थराशौ आद्य: श्लोकोऽयं व्याख्यायते—

'आसीदिदं तमोभूत'मित्यादि । तत्र 'आसी'दिति भूतकालप्रत्ययेन प्रागवस्था जगतो निदिश्यते । 'तमोभूत'मित्यलक्षरूपत्वात् ।...इदमिति जगदभिसम्बध्यते । अमुमेवार्थं स्फुटं चिकीर्षुराह । 'न प्रज्ञायत किंचने'ति । तस्मिंस्तमोभूते जगति स्वयम्भू भगवान् 'प्रादुरासीच्चतुर्मुख' इति, स च स्वयम्भूरतो यत स्तस्योत्पत्ते: कर्ता कश्चिदन्यो न वर्तते । भगवानिति पूजापदम् । प्रादु: प्रकाशार्थ: । आसीदिति भूतकालपर्य्याय: । प्रादुरासीत् प्रकाश आसीदिति । 'चतुर्मुख' इति रूपनिर्देश: । स च स्वयम्भू: प्रजापति र्ब्रह्मा । स चास्याज्ञाततमसान्धस्य जगत स्तत्स्वयमशीतिशतसहस्रं धर्मव्यवस्थास्थिति-ज्ञापकं शास्त्रं कृत्वा सदाचारसंव्यवहारप्रकाशकमुद्योतकमकरोत् तस्माच्छास्त्राद्व्यवहाराध्याय एवायमिति सुप्रपञ्चितोऽभिहित: । सर्वलोकोपकारित्वात्, नारदमहर्षिणा । अस्यायमाद्य: श्लोक: । ५।।६।।

---

**भवस्वामिप्रणीतं भाष्यम्**— नारदीयमनुसंहितासंज्ञक: य एव ग्रन्थ: स्वतन्त्रतयोपलभ्यते, यश्च के साम्ब-शिवशास्त्रिणा संशोधित:, तथा हस्तलिखितपुस्तिकाचतुष्टयमाश्रित्य भवस्वामिकृतभाष्योपेतश्च प्रकाशित: ( अनन्त-शयनसंस्कृत ग्रन्थावलि:, ग्रन्थाङ्क: ९७, Trivandrum, 1929 ) तेन ग्रन्थेन सह प्रकाशित-नारदस्मृते: बहुश: सादृश्यं श्लोकगतं वर्त्तते इति कृत्वा यत्र यत्र श्लोकगतं सादृशं तत्र तत्र भवस्वामिप्रणीतं भाष्यं योजनीयमिति आदावेव सप्रश्रयं निवेद्यते । अनेन भाष्यग्रन्थेन सह साम्यवैषम्यप्रदर्शनद्वारेण मूलनारदस्मृते: मूल्यायनं युक्तियुक्तं भवदेव । मूलग्रन्थगतपाठादिकमपि यथायथमनेन प्रकारेण विशुद्धिमाप्नुयात् ।

नारदीयमनुसंहितायां तु मातृकाप्रकरणं यथा नारदस्मृतौ तथा नोपलभ्यते इति कृत्वा तत्र भवस्वामिप्रणीतं भाष्यं न लभ्यते । इमां नारदीयमनुसंहितामधिकृत्य अतिपाण्डित्योपेतं दीर्घं गवेषणापत्रं अध्यापकवरेण T. R. Chintamani महोदयेन प्रकाशितम् (in the *Kunhan Raja Presentation Volume*, Published by the Adyar Library, Madras, 1946), तत्र विशेषत: १५९-१६३ पृष्ठपर्य्यन्तं, तथा १६३-१६६ पर्य्यन्तं द्रष्टव्यम् । वैशिष्ट्यावहमालोचनं पुन: भवस्वामिभाष्यमवलम्ब्य, P. V. Kane महोदयेन विहितं तदीये ग्रन्थे *History of Dharmaśāstra*, Vol. I, Pt. I. पृ: ४७७-४७३ पर्य्यन्तं (Revised edition, Poona, 1968) ।

## नारदस्मृतितत्त्वप्रकाशिका ।

नारदीयस्मृतिः शस्ता व्यवहारविधौ मता ।
असहायकृतं भाष्यं सम्पूर्णं नोपलभ्यते ।।
पूर्वापरनिबन्धादिग्रन्थानुशीलनेन हि ।
लब्धसङ्केतसामर्थ्याद् व्याख्यान्तरसहायतः ।।
नवा प्रणीयते चेयं तस्या स्तत्त्वप्रकाशिका ।
हेरम्बनाथविप्रेण चट्टोपाध्यायशास्त्रिणा ।।
तां सन्तः सुधियो द्रष्टुमर्हन्ति गुणवत्तया ।
गुणागुणविवेक्तार स्त एव स्युः प्रमापकाः ।।

धर्मशास्त्रप्रवक्तृत्वेन नारदस्य नाम यद्यपि याज्ञवल्क्येन न परिगणितं—(मन्वत्रिविष्णु-हारीत······वशिष्ठश्च धर्मशास्त्रप्रयोजकाः, याज्ञवल्क्यस्मृतिः, १.४-५ अनुसन्धेया), पराशर-स्मृतौ च यद्यपि नाम्ना नोल्लिखितः नारदः (श्रुता मे मानवा धर्मा······श्रुता ह्येते भवत्प्रोक्ताः श्रुत्यर्था मे न विस्मृताः ।। १.१२-१५) तथाप्यत्र स्मरणीयं यन्मानवे धर्मशास्त्रे दश प्रजापती-नामन्यतमत्वेन नारदस्य विवरणं प्रदर्शितं यथा—

पतीन् प्रजानामसृजं महर्षीनादितो दश । १.३४
मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च ।। १.३५

महाभारते असकृत् नारदविषयकानि तथ्यान्युपलभ्यन्ते । तथाहुरुद्योगपर्वणि—(४६-२२)

तस्मात् कर्मैव कर्त्तव्यमिति ह्रीवाच नारदः ।
एतद्धि सर्वमाचष्ट वृष्णिचक्रस्य वेदवित् ।। इति ।

द्रष्टव्यानि पुनः शान्तिपर्वणि (३०-६ ; २६-३) नारदविषयकानि वाक्यानि ।
याज्ञवल्क्यस्मृतेः टीकाकृता विश्वरूपेण (१.४-५) संख्यकं श्लोकमाश्रित्य वृद्धयाज्ञवल्क्यस्य वचनमुदाहृतं यत्रादावेव नारदनाम सङ्कीर्त्तितम्—यथा—

"भूयांसो वेदकर्त्तार उत्पन्ना भाविन स्तथा ।
निधानं सर्वधर्माणां वेद एव हि शाश्वतः ।। इति ।

पुनश्चाह—नारदः पुलहो गार्ग्यः पुलस्त्यः शौनकः क्रतुः ।
बौधायनो जातुकर्णो विश्वामित्रः पितामहः ।।

धर्मशास्त्रकृतां संख्याविषये आलोचनीयाः ग्रन्थाः—
P. V. Kane *History of Dharmaśāstra*, I-I, Poona, 1968, pp. 302-4.
H. Chatterjee, *Dāyabhāga* (Ed), Calcutta, 1978, (Introduction). pp. VII-VIII.

कस्यापि अद्यत्वेनोपलब्धस्य स्मृतिग्रन्थस्य श्लोकाकारेणोपलब्धस्य गद्यविधौ विरचितं प्राक्कथनं नालोक्यते इति कृत्वा परमकौतुकावहमिदं विपश्चिताम् । अधिकतरं विस्मयकर-

मिदं यदत्र मनुप्रणीतस्य धर्मशास्त्रस्य चतुर्विधं यत् परिवर्त्तनात्मकं संस्करणं जातं तस्य विवरणं प्रदर्शितम् । ऋग्वेदाब्दारभ्य उत्तरकालीनेषु धर्मशास्त्रेष्वसकृत् मनो र्नाम परमपूज्यतया उल्लिख्यते । ऋग्वेदे क्वचित् पितृत्वेन कथनम् (१.८०.१६ ; १.११४.२, ८.६३.१ ; २.३३.१३—'यानि मनुरावृणीता पितो नः' । अष्टममण्डलस्य ३०.३ सूक्ते प्रार्थनमालोक्यते येन—'मा नः पिव्यान्मानवादधि दूरं नैष्ट'...... । प्रथमे मण्डले अग्नेः स्थापकत्वेन मनो र्नामाकर्णितं यथा—'नि त्वामग्ने मनुर्दधे ज्योति र्जनाय शश्वते' (१.३६.१९) । तैत्तिरीयसंहितायां 'यद्वै किं च मनुरवदत्तद्भेषजमिति (२. २.१०.२) यदुक्तं, ताण्ड्यमहाब्राह्मणेऽपि तदनुरूपमुपस्थापितं यथा—'मनु र्वै यत्किञ्चनावदत्तद्भेषजं भेषजतायै' ( २३.१६.१७ ) । तस्यामेव तैत्तिरीयसंहितायां (३.१.९.४-५) तथा ऐतरेयब्राह्मणे (५.१४) उल्लिखितं यन्मनुः पुत्रेभ्यो दायं व्यभजदिति ; पुत्रं च नाभानेदिष्ठं दायेभ्यः वञ्चितमकरोदिति च । निरुक्ते (तृतीयेऽध्याये) पुत्राणां तथा कन्यानां दायाधिकारप्रसङ्गतः स्वायम्भुवमनो र्मतमुदाहृतं यथा—

अविशेषेण पुत्राणां दायो भवति धर्मतः ।
मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत् ॥ इति ।

महाभारते अनेकशः क्वचित् मनुरिति सामान्यनाम्ना, क्वचित् स्वायम्भूव इति व्यपदेशेन (शान्ति. २१.१२), क्वचित् प्राचेतस इति विशेषणोपेततया (शान्ति, ५७.४३) मनो र्नामोल्लेखो विहितः । शान्तिपर्वणि (३३६. ३८-४६) स्पष्टतः उल्लिखितं यत् पुरुषोत्तमेन कृतं सहस्रश्लोकात्मकं शास्त्रमुत्तरे काले स्वायम्भुवा मनुना प्रचारितम् । तदुक्तम्—

ऋषीनुवाच तान् सर्वानदृश्यः पुरुषोत्तमः ।
कृतं शतसहस्रं हि श्लोकानामिदमुत्तमम् ॥
लोकतन्त्रस्य कृत्स्नस्य यस्माद्धर्मः प्रवर्त्तते ।

* * *

तस्मात् प्रवक्ष्यते धर्मान् मनुः स्वायम्भुवः स्वयम् ।

* * *

स्वायम्भुवेषु धर्मेषु शास्त्रे चौशनसे कृते ।
बृहस्पतिमते चैव लोकेषु प्रतिचारिते ॥

अन्यत्र शान्तिपर्वणि (५९-८५......) शास्त्रस्य विभिन्नेषु कालेषु परिवर्तनं केन कथं विहितमिति सङ्केतितं यथा—

तस्मिन् पैतामहे शास्त्रे पाण्डवैतदसंशयम् ।
धर्मार्थकाममोक्षाश्च सकला ह्यत्र शब्दिताः ॥ ८५
तत स्तां भगवान्नीतिं पूर्वं जग्राह शङ्करः ।
बहुरूपो विशालाक्षः शिवः स्थानुरुमापतिः ॥ ८६
युगानामायुषो ह्रासं विज्ञाय भगवान् शिवः ।
संचिक्षेप ततः शास्त्रं महार्थं ब्रह्मणा कृतम् ॥ ८७

वैशालाक्षमिति प्रोक्तं तदिन्द्रः प्रत्यपद्यत ।
दशाध्यायसहस्राणि सुब्रह्मण्यो महातपाः ।। ८८
भगवानपि तच्छास्त्रं संचिक्षेप पुरंदरः ।
सहस्रैः पञ्चभि स्तात यदुक्त बाहुदन्तकम् ।। ८९
अध्यायानां सहस्रैस्तु त्रिभिरेव बृहस्पतिः ।
संचिक्षेपेश्वरो बुद्ध्या बार्हस्पत्यं तदुच्यते ।। ९०
अध्यायाणां सहस्रेण काव्यः संक्षेपमब्रवीत् ।
तच्छास्त्रमभितप्रज्ञो योगाचार्य्यो महातपाः ।। ९१
एवं लोकानुरोधेन शास्त्रमेतन्महर्षिभिः ।
संक्षिप्तमायु विज्ञाय मर्त्यानां ह्रासि पाण्डव ।। ९२

मनुस्मृतौ इदमेव प्रपञ्चितं यद् ब्रह्मा शास्त्रं रचयित्वा सृष्ट्यादौ मनुमेव ग्राहयामास, मनुश्च मरीच्यादीन् मुनीन् अध्यापितवान् । तदुक्तं तत्र—

इदं शास्त्रं तु कृत्वासौ मामेव स्वयमादितः ।
विधिवद्ग्राहयामास मरीच्यादीं स्त्वहं मुनीन् ।। १.५८ ।
एतद्वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः ।
एतद्धि मत्तोऽधिजगे सर्वमेषोऽखिलं मुनिः ।। १.५९

नारदेन तु अत्र नारदस्मृतेः पूर्वभाषणेऽपि मनुप्रणीतस्य धर्मशास्त्रस्य विभिन्नेषु कालेषु परिवर्त्तनं संशोधनं स्वल्पीकरणञ्च सङ्केतितम् । नारदेन स्पष्टमेवोल्लिखितं यन्मानवीयं शास्त्रमाचारस्थितिहेतुभूतम् । मानवीयं वचनमत्र स्मर्त्तव्यं यथा—

अस्मिन् धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम् ।
चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ।। १।१०७
आचारः परमो धर्मः श्रुत्युक्तः स्मार्त्त एव च ।
तस्मादस्मिन् सदा युक्तो नित्यः स्यादात्मवान् द्विजः ।। १।१०८

* * *

एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिम् ।
सर्वस्य तपसो मूलमाचारं जगृहुः परम् ।। १।११०

* * *

देशधर्मान् जातिधर्मान् कुलधर्मांश्च शाश्वतान् ।
पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन् उक्तवान् मनुः ।। १।११८

* * *

एतद्वोऽभिहितं सर्वं निःश्रेयसकरं परम् ।
अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिम् ।। १२।११६

* * *

इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन् द्विजः ।
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम् ।।

भगवता मनुना स्वग्रन्थस्य प्रथमेऽध्याये ग्रन्थस्य प्रकरणादिकं निर्देशितं यथा—

जगतश्च समुत्पत्तिं संस्कारविधिमेव च ।
व्रतचर्य्योपचारं च स्नानस्य च परं विधिम् ।। १।१११
दाराधिगमनं चैव विवाहानां च लक्षणम् ।
महायज्ञविधानञ्च श्राद्धकल्पं च शाश्वतम् ।। १।११२
वृत्तीनां लक्षणं चैव स्नातकस्य व्रतानि च ।
भक्ष्याभक्ष्यं च शौचं च द्रव्याणां शुद्धिमेव च ।। १।११३
स्त्रीधर्मयोगं तापस्यं मोक्षं संन्यासमेव च ।
राज्ञश्च धर्ममखिलं कार्य्याणां च विनिर्णयम् ।। १।११४
साक्षिप्रश्नविधानं च धर्मं स्त्रीपुंसयोरपि ।
विभागधर्मं द्यूतं च कण्टकानां च शोधनम् ।। १।११५
वैश्यशूद्रोपचारं च संकीर्णानां च संभवम् ।
आपद्धर्मं च वर्णानां प्रायश्चित्तविधिं तथा ।। १।११६
संसारगमनं चैव त्रिविधं कर्मसम्भवम् ।
निःश्रेयसं कर्मणां च गुणदोषपरीक्षणम् ।। १।११७
देशधर्मान् जातिधर्मान् कुलधर्मांश्च शाश्वतान् ।
पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन् उक्तवान् मनुः ।। १।११८

प्रासङ्गिकतया उपस्थाप्यमिदं यत् पुराणेषु मनोः संख्याविषये मतानैक्यं वर्त्तते । वायुपुराणे (२६।३२-४६), पद्मपुराणे (५।७।८१-११५) च चतुर्दशमनूनामुल्लेखः ; विष्णुपुराणे (३।१।६...) ; ब्रह्माण्डपुराणे (२।३६।३-५) तु द्वादशमनूनामुल्लेखः । वायुपुराणे (१००।५३) मनुशब्दस्य व्युत्पत्ति वर्त्तते—मननान्माननाच्चैव तस्मात्ते मनवः स्मृताः इति । कुमारिलेन तन्त्रवार्त्तिके उल्लिखितं यत्—

प्रतिमन्वन्तरं चैव स्मृतिरन्या विधीयते ।
स्थिताश्च मनवो नित्यं कल्पे कल्पे चतुर्दश ।।(तन्त्रवार्त्तिकम्, पृः २०२)

तत्र स्वायम्भुव-मनुः, प्राचेतसमनुः, मनुरिति नामदर्शनात् मनोः स्वरूपमुपजीव्य विसंवादः वर्त्तते । मनुसंहितायां (६।५४) स्वायम्भुवमनोरुल्लेखः । तथाऽन्यत्रापि ८।१२४, ६।१५८ संख्यके श्लोकेऽपि । द्वितीये सप्तमे चाध्याये मनो नाम नालोक्यते । नवमे अध्याये (६।१३८) यदुल्लिखितं तेन स्वायम्भुव-मनोरेव सङ्केत इति कथयितुं शक्यते । तदुक्तं तत्र—

पुन्नाम्नो नरकाद्यस्मात् त्रायते मातरं सुतः ।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव **स्वयम्भुवा** ।।

अष्टमेऽध्याये (८।१३६) '**तन्मनोरनुशासन**'मिति यदविशिष्य उल्लिखितं तदन्यत्राप्यालोक्यते यथा—८।२७६, ६।२३६ । एवं 'मनुरब्रवीत्' इति असकृदालोक्यते यथा—३।१५०; ३।२२२; ४।१०३; ५।४१, १३१... ।

दशमेऽध्याये ७८ संख्यके श्लोके मनु-प्रजापतेरुल्लेखः—'...मनुराह प्रजापतिः' इति । उल्लेख्यमत्र—

'एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।' इति ( १२।१२३ )

मनुस्मृतौ विषयविशेषेषु प्राचीन स्तथार्वाचीनोऽंश वर्त्तते इति पण्डितानां मतम् । तत्र कारणं तु मनुप्रणीतेषु निर्देशेषु परस्परं विरोध आलोक्यते इति । दिङ्मात्र मत्रोदाहृतं यथा मनुप्रणीते शास्त्रे तृतीयेऽध्याये ( १२-१३ ) ब्राह्मणस्य शूद्रजातीया भार्य्या भवितु मर्हतीति प्रतिपादितं—

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि ।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः ।। ३।१२
शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते ।
ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः ।। ३।१३

अनन्तरं पुनरुत्तरश्लोकेषु ब्राह्मणकर्तृकः शूद्राजातीयस्त्रीपरिणयः गर्हितत्वेन परिकल्पितः ।

यथा—

न ब्राह्मणक्षत्रिययो रापद्यपि हि तिष्ठतोः ।
कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्य्योपदिश्यते ।। ३।१४

द्रष्टव्यं श्लोकान्तराणि—३।१५-१८, विशेषतः

३।१९ : वृषलीफेनपीतस्य निःशासापहृतस्य च ।
तस्यां चैव प्रसूतस्य निष्कृति र्न विधीयते ।।

विवाहविषये मनुवचनेषु विरोधः संलक्ष्यते ; तत्र द्रष्टव्यं श्लोकचतुष्टयम् ३.२३-२६ ।

नवमेऽध्याये मनुना नियोगः समर्थितः यथा—

देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताऽधिगन्तव्या सन्तानस्य परिक्षये ।। ९.५९
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथंचन ।। ९.६०

द्रष्टव्यञ्चाधिकतया, ९.६१-६३ ।

तस्मिन्नेवाध्यायेऽतिस्पष्टतया निन्दितः खलु नियोगः यथा—

नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम् ।। ९.६४
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं पुनः ।। ९.६५
अयं द्विजै हि विद्वद्भिः पशुधर्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ।। ९.६६

अस्मिन् विषये प्राकरणिकतया वार्हस्पत्यं वचनमुदाहार्य्यं यत्र मनुना नियोगस्य समर्थनं, तत्कालमेव तस्य गर्हितत्वप्रतिपादनं विहितम् । तदुक्तं तेन—

उक्त्वा नियोगो मनुना निषिद्धः स्वयमेव तु ।
युगह्रासादशक्योऽयं कर्त्तुं सर्वं विधानतः ।। २५.१६

मनो र्महात्म्यज्ञापकं भाषितं बृहस्पतेः स्मरणीयमत्र—

वेदार्थोपनिवन्धृत्वात् प्रामाण्यं तु मनोः स्मृतम् ।
मन्वर्थविपरीता या स्मृतिः सा न प्रशस्यते ।। संस्कार, का:, १३
तावच्छास्त्राणि शोभन्ते तर्कव्याकरणानि च ।
धर्मार्थमोक्षोपदेष्टा मनु र्यावन्न दृश्यते ।। सं, का:, १२

विषयेऽस्मिन् बाहुल्येन विचारितं G. Buhler महोदयेन (*The Laws of Manu, Sacred Books of the East*, vol. XXV, pp. LXVI-LXXIII) । सर्वं तदीयं मतं यथायथं पर्य्यालोच्य P.V. Kane महोदयेन सिद्धान्तितं यत्तदाङ्गलभाषयां उपस्थापितं यथा—

'My own position is that the original *Manusmṛti* in verse had certain additions made in order to bring it in a line with the change in the general attitude of people as several points such as those of flesh-eating *niyoga* & etc.'

(*History of Dharmaśāstra,* vol. I, part I, Revised and enlarged edition, Poona, 1968, p. 332).

अखिलमिदं पर्य्यालोच्य इदं कथयितुं शक्यते यत् मनुप्रणीतस्य धर्मशास्त्रस्य परिवर्त्तनं कथञ्चित् कस्मिन्नपि काले तु सञ्जातमेवेति ।

नारदेन तद्ग्रन्थस्य पूर्वभाषणे काले काले मनुकृतशास्त्रस्य परिवर्त्तनं तथा ह्रस्वीकरणं यद्विहितं तत्तु स्वग्रन्थस्य महत्त्वप्रतिपादनार्थमेवेति कथयितुं शक्यते । परन्तु इदं नारदभाषितं उत्तरे काले संयोजितं नारदस्मृतौ इति तु मतं न विचारसहं यतः मेधातिथिपादेन खृष्टीय-नवम-शताब्द्यां नारदमतमिदमुल्लिखितं मनुसंहितायाः प्रथमाध्यायस्य ५८-संख्यक-श्लोकस्य व्याख्यानावसरे यथा–

'नारदश्च स्मरति–शतसाहस्रो ग्रन्थः प्रजापतिना कृतः, स मन्वादिभिः क्रमेण संक्षिप्त इति ।

हेमाद्रिकृते चतुर्वर्गचिन्तामणौ, संस्कारमयूखे, ग्रन्थान्तरे च भविष्यपुराणोक्तं वचनमुदाहृतं यत्रोल्लिखितं स्वायम्भुवशास्त्रस्य चतुर्विधं परिवर्त्तनम् । तथा हि उक्तं चतुर्वर्गचिन्तामणौ दानखण्डे ( पृ: ५२८ )—

भार्गवीया नारदीया च बार्हस्पत्याङ्गिरस्यपि ।
स्वायंभुवस्य शास्त्रस्य चतस्रः संहिताः मताः ।।

संस्कारमयूखोऽपि द्रष्टव्यः ( पृ: २ ) ।

मनुसंहितामधिकृत्य बहवः ग्रन्थाः पाण्डित्योपेताः प्रबन्धाश्च विरचिताः । दिङ्मात्रमत्र नाम्ना उल्लिख्यते—

*Muir's Original Sanskrit Texts*, Vol. I, article on *Manu*, pp. 161-238 (2nd Edition of 1872) ;

E. W. Hopkins—'*Professed quotations from Manu found in the Mahābhārata*' in *Journal of the American Oriental Society*, Vol. XI, pp. 239-275.

G. Bühler, Introduction to the English Translation of *Manusmṛti*, in *Sacred Books of the East Series*, Vol. XXV, pp. XI-XXXVII.

K. P. Jayaswal, *Manu and Yājñavalkya*, (Calcutta, 1933).

नेपालदेशीय-नारदप्रणीतशास्त्रस्य पूर्वभाषणे यदुल्लिखितं तस्य परिपोषकतयेदमुच्यते यत् हस्तलिखितपुस्तके नारदस्मृतेरभिधानं तु मनुस्मृतेः संक्षिप्ताङ्गतयैव इति । तथाहि यथा मनुसंहितायाः अध्यायान्तिमेऽंशे 'मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां'..., अथवा 'मानवे धर्मशास्त्रे भृगुप्रोक्ते' इति भणितं तथैवात्रापि लिखितं-'मानवे धर्मशास्त्रे नारदप्रोक्तायां संहितायाम्' इति ।

अपि च आङ्गलभाषायां विश्लिष्य Jolly महोदयेन अस्यैव मतस्य दृढीकरणार्थं प्रपञ्चितं यथा—

'Again, the chapter on theft (*caurapratiṣedha*), which has come to light in Mr. Bendall's Nepalese Palm-leaf manuscript of Nārada, and in a Nepalese paper Ms. recently discovered by the same scholar, forms an appendix to the body of the *Nāradasmṛti* exactly in the same way as an analogous chapter on robbery and other criminal offences is tacked on at the close of the eighteen titles of law in the Code of Manu, IX, 252-293.

It also deserves to be noted, perhaps that the *Dhamathats* of Burma, while professing to be founded on the laws of Manu, contain several rules and maxims which may be traced to the *Nāradasmṛti* whereas they do not occur in the code of Manu.' (Forchhammer, The Jardine Prize Essay, pp. 44-58).

Jolly महोदयेन उल्लिखितसिद्धान्तमाश्रित्य अन्यदपि यद्भाषितं तदपि विचारसहमिति कृत्वा सश्रद्धमत्र निवेद्यते :

Although, therefore, there appears to be an element of truth in Nārada's account of the history of the Code of Manu, and of his own *Smṛti*, there can be no doubt that the actual position of the two works has been inverted by him. The composition of Bhṛgu, or of Sumati the son of Bhṛgu, i.e the now extant Code of Manu, is not posterior, but decidedly anterior, in date to the *Nārada-Smṛti*, as may be gathered easily

from a comparison of both works. Thus e.g. Nārada mentions twenty-one modes of acquiring property, fifteen sorts of slaves, fourteen species of impotency, three kinds of women twice married, and four kinds of wanton women, twenty women whom a man must not approach, thirtytwo divisions of the law of gift, eleven sorts of witnesses, five or seven ordeals, four or five losers of their suit, two kinds of proof and two kinds of documents, seven advantages resulting from a just decision, eight members of a law suit, one hundred and thirytwo divisions of the eighteen principal titles of law. The first germs of some of these interesting theories may be traced to the Code of Manu, and it is interesting to note how these germs have been developed by Nārada. As a rule, his judicial theories show an infinitely advanced stage of development as compared to Manu's and his treatment of the law of procedure, in particular, abounding as it does in technical terms and nice distiction and exhibiting a decided preference for documentary evidence and written records over oral testimony and verval procedure, exhibits manifest signs of recent composition.

An analogous inference may be drawn from the fact that Nārada was apparently acquainted with a work either identical with or closely allied to, the now extant Code of Manu. His analysis of the contents of the original Code composed by Manu in 100000 slokas corresponds in the main to the topics treated in the work as it now stands. He quotes the opening verse of the original gigantic work of Manu, and it is a remarkable coincidence that the verse agrees with Manu, 1, 5, 6 i.e with the actual exordium of the Code of Manu as verses 1—4 serve as an introduction only and, may be, a subsequent addition. Forensic law is alleged to have formed the subject of the ninth Chapter of the original composition of Manu. In the Code of Manu, law and judicature are discussed in the eighth and ninth chapters. The twentyfour chapters divided into one thousand and eighty, i.e 45 × 24 sections of the original Code, seem to represent double the twelve chapters of the Code of Manu. On the other hand, Sumati, the son Bhṛgu, who is alleged to have reduced the original Code of Manu to its present size, and to have produced the law-book now current among mankind, may be identified with Bhṛgu, the supposed author of the actual *Manusmṛti*, and the number of 4000 ślokas, which is assigned to his composition, may be taken to be a rough statement of the actual extent of the *Manusmṛti*, which in reality runs up to 2685 ślokas only.

A consideration of these facts leaves but little doubt that the compiler of the *Nārada-smṛti*, whoever he was, must have been acquainted with a work closely akin to the now extant *Manusmṛti*. This is so much the more probable because several of his references to the authoritative

enunciations of Manu may be actually traced to the *Manusmṛti,* and because a number of verses either occuring in the Mss. of the *Nārada-smṛti,* or attributed to him by the digest-writers recur in the Code of Manu. (vide Introduction, pp. XIII-XIV, of English translation of the *Nāradasmṛti, S.B.E. XXXIII.*)

(द्रष्टव्यमत्र स्तेयमधिकृत्य नारदभाषितं यथा—

धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ।
न्यूनं वैकादशगुणं दण्डं दाप्योऽब्रवीन्मनुः ।। परिशिष्टे श्लोकसंख्या-२६ ।

मानवीयं वचनमत्र—

धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ।
शेषेऽप्येकादशगुणं दाप्य स्तस्य च तद्धनम् ।। ८.३२०

तुलनीयं नारदवचनं—

सुवर्णरजतादीनामुत्तमानां च वाससाम् ।
रत्नानां चैव मुख्यानां शतादभ्यधिके वधः ।। परिशिष्टे श्लोकसंख्या-२७ ।

मानवीयं वचनमत्र—

तथा धरिममेयानां शतादभ्यधिके वधः ।
सुवर्णरजतादीनामुत्तमानां च वाससाम् ।। ८.३२१

तथा— पुरुषाणां कुलीनानां नारीणां च विशेषतः ।
मुख्यानां चैव रत्नानां हरणे वध मर्हति ।। ८.३२३

पुनरपि नारदेन यन्मनोर्नामोल्लेखपूर्वकं भाषितं—

येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेवास्य छेत्तव्यं तन्मनोरनुशासनम् ।। परिशिष्टे-३४

मनुस्मृतौ मूलमत्रानुधावनीयं यथा—

येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ।। ८.३३४

अन्यदपि नारदे— दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् ।
त्रिषु वर्णेषु यानि स्यु र्ब्राह्मणः अक्षतः सदा ।। परिशिष्टे-३६
उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षु र्नासा च कर्णौ च धनं देह स्तथैव च ।। ,, ३७

मनुवचनमत्र— दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् ।
त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत् ।। ८.१२४
उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षु र्नासा च कर्णौ च धनं देह स्तथैव च ।। ८.१२५

अन्यदपि नारदीयं वचनं स्मरणीयमत्र—

अपराधं परिज्ञाय देशकालौ च तत्त्वतः ।
स्तरानुबन्धावालोक्य दण्डानेतान् प्रकल्पयेत् ।। परिशिष्टे-३८

मानववचनमनुरूपमेव—

अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः ।
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् ।। मनु, ८.१२६ ।

यत् पुनः नारदेन भाषितं—

न मित्रकारणाद्राजा विपुलाद्वा धनागमात् ।
उत्स्रष्टव्यः साहसिक स्तक्त्वात्मा मनुरब्रवीत् ।। परिशिष्टे-३६

तदपि मनुवचनानुरूपं यथा—

न मित्रकारणाद्राजा विपुलाद्वा धनागमात् ।
समुत्सृजेत् साहसिकान् सर्वभूतभयावहान् ।। ८.३४७)

नारदेन मनुप्रणीतस्य शास्त्रस्य चतुर्विंशतिसंख्यकानां प्रकरणानां यः उल्लेखः विहितः तानि प्रकरणाणि पुनः इदानीन्तनकाले लब्धे मानवधर्मशास्त्रे उपलभ्यन्ते एव । दिङ्मात्रमत्रोपस्थाप्यते । तथा हि मनुस्मृतौ सृष्टितत्त्वमुपवर्णितं प्रथमे अध्याये पञ्चमसंख्यकश्लोकादारभ्य ५७ संख्यकश्लोकपर्यन्तम् । तत्र पुनः ३४-५० संख्यकेषु श्लोकेषु भूतप्रविभागविषयकं कथनं वर्त्तते । द्वितीयाध्यायस्य १७-२३ संख्यकेषु श्लोकेषु विवेचनं सद्देशप्रमाणानां ; पर्षल्लक्षणं विवेचितं तु मनुस्मृतेः द्वादशाध्यायस्य १०८-११४ संख्यकेषु श्लोकेषु ; वेदवेदाङ्गानुसारं यज्ञविधानं निर्देशितं मनुस्मृतेः तृतीयाध्यायस्य ६९-संख्यक-श्लोकतः २८६ संख्यकश्लोकेषु (एतद्वोऽभिहितं सर्वं विधानं पाञ्चयज्ञिकम्), तथा चतुर्थाध्यायस्य २१ संख्यकश्लोकतः २८ संख्यकश्लोकपर्यन्तम् ; आचारस्यालोचनं तस्मिन्नेव ग्रन्थे बहुधा कृतं ( यथा प्रथमाध्याये १०७ संख्यके श्लोकेऽभिहितं—

अस्मिन् धर्मोऽखिलेनोक्तो गुणोदोषौ च कर्मणाम् ।
चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ।।

तथा,— आचारः परमो धर्मः श्रुत्युक्तः स्मार्त्त एव च ।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ।। १.१०८ ।

तथा—चतुर्थाध्याये १५६ संख्यके श्लोके—

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः ।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ।।

व्यवहारस्यालोचनं विहितं भगवता मनुना—

'व्यवहारान् दिदृक्षु स्तु ब्राह्मणैः सहः पार्थिवः ।
मन्त्रज्ञैः मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ।।'

(८।१) इत्युपक्रम्य अष्टमे अध्याये तथा नवमे ।

कण्टकशोधनं निर्देशितं तेनैव—

सम्यङ्निविष्टदेशस्तु कृतदुर्गश्च शास्त्रतः ।
कण्टकोद्धरणे नित्यमातिष्टेद्यत्नमुत्तमम् ।। (९.२५२) इत्युपक्रम्य—
सीताद्रव्यापहरणे शस्त्राणामौषधस्य च ।
कालमासाद्य कार्य्यं च राजा दण्डं प्रकल्पयेत् ।। (९.२९३) पर्य्यन्तम् ।

'राजधर्मान् प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
संभवश्च यथा तस्य सिद्धिश्च परमा यया ।' इत्युपक्रम्य सप्तमेऽध्याये राजवृत्तमालोचितं मनुना ।

वर्णाश्रमविभागश्च प्रदर्शितः प्रथमाध्यायस्य—

सर्वस्यास्य तु धर्मस्य गुप्त्यर्थं स महाद्युतिः ।
मुखबाहूरुपज्जानां पृथक् कर्माण्यकल्पयत् ।। (१.८७) इत्यारभ्य १.१०१ श्लोकपर्य्यन्तम् ; पुनः नवमाध्यायस्य—

'एषोऽखिलो कर्मविधिरुक्तो राज्ञः सनातनः ।
इमं कर्मविधिं विद्यात् क्रमशो वैश्यशूद्रयो ।।' (९।३२५)

इत्यारभ्य— एषोऽनापदि वर्णानामुक्तः कर्मविधिः शुभः ।
आपद्यपि हि य स्तेषां क्रमश स्तं निबोधत ।। (९.३३६) इत्यन्तं यावत्, ततः परमपि ।

'वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।
अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममावसेत् ।।'

इति तृतीयाध्यायस्य द्वितीयश्लोकमुपक्रम्य—

स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् ।
तस्यां त्वरोचमानायां सर्वमेव न रोचते ।। (३।६२)

इत्यन्तं यावत् विवाहन्यायः पर्य्यालोचितः ।

'पुरुषस्य स्त्रिया श्चैव धर्म्ये वर्त्मनि तिष्ठतोः ।
संयोगे विप्रयोगे च धर्मान् वक्ष्यामि शाश्वतान् ।। (९.१)

इत्यारभ्य नवमे अध्याये—'एष स्त्रीपुंसयो रुक्तो धर्मो वो रतिसंहितः ।'—(९.१०३) श्लोकं यावत् आलोचितः पतिपत्न्योः धर्मः । ततः परं अस्मिन्नेवाध्याये नवमे 'दायभागं निबोधत' (९.१०३) इत्यभिधाय—'अयमुक्तो विभागो वा पुत्राणां वा क्रियाविधिः' । क्रमशः क्षेत्रजादीनां···(९.२२०) इत्यन्तं यावत् दायानुक्रमः प्रपञ्चितः ।

श्राद्धादिविधानं प्रदर्शितं तृतीयेऽध्याये—

'पितृयज्ञं तु निर्वर्त्य विप्र श्चेन्दुक्षयेऽग्निमान् ।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकम् ।। ( ३.१२२ )

इत्युपक्रम्य, 'एतद्वोऽयमभिहितं सर्वं विधानं पाञ्चयज्ञिकम्' ( ३.२८६ ) इत्यन्तं यावत् ।

'प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च ।
चतुर्णामपि वर्णानां यथावदनुपूर्वशः ।।' ( ५।५७ )

इत्युपक्रम्य पञ्चम अध्याये—

'एष शौचविधिः कृत्स्नो द्रव्यशुद्धि स्तथैव च ।
उक्तो वः सर्ववर्णानां······ ।। ( ५।१४६ )

इत्यन्तं यावत् शौचविधिः प्रतिपादितः । भक्ष्याभक्ष्यविचारणा कृता तस्मिन्नेव पञ्चमेऽध्याये प्रथमश्लोकादारभ्य ५६ श्लोकपर्य्यन्तम् । विक्रेयाविक्रयमीमांसा निगदिता दशमा-

ध्यायस्य ८५ संख्यकं श्लोकमारभ्य ९४ संख्यकश्लोकं यावत् । पातकभेदाः प्रदर्शिताः एकादशे अध्याये—

'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ।। इति (११.५४) श्लोकादारभ्य
एतान्येनांसि सर्वाणि यथोक्तानि पृथक् पृथक् ।
यैर्यैर्व्रतैरपोह्यन्ते तानि सम्यङ् निबोधत ।। ( ११.७१ )

इति श्लोकपर्य्यन्तम् । मनुसंहितायाः चतुर्थे अध्याये ८८-९० संख्यकेषु श्लोकत्रयेषु एकविंशतिसंख्यकानां नरकाणामुल्लेखो वर्त्तते ।

एकादशेऽध्याये—

एतान्येनांसि सर्वाणि यथोक्तानि पृथक् पृथक् ।
यैर्यैर्व्रतैरपोह्यन्ते तानि सम्यङ् निबोधत ।। (११.७१)

इत्युपक्रम्य अध्यायान्तं यावत् (२६५ श्लोकपर्य्यन्तम्) प्रायश्चित्तादिकमुपवर्णितम् ।

उपनिषदः उल्लेखः द्वितीयेऽध्याये (२.१६५) ; तथा षष्ठाध्यायस्य २९ संख्यके श्लोके परिलक्ष्यते । द्वादशाध्यायः मनुसंहितायाः अस्मिन् विषये द्रष्टव्यः ।

'भगवान् मनुरुपनिबध्य महर्षये नारदाय प्रायच्छत्', इति वाक्ये मनो र्यन्नाम ग्रहणं तत्तु स्वायमभुवमनोरिति बोध्यम् । अत्र मनुसंहितायाः श्लोकः द्रष्टव्यः प्रथमाध्यायगतः यथा—

इदं शास्त्रं तु कृत्वासौ मामेव स्वयमादितः ।
विधिवद्ग्राहयामास मरीच्यादीं स्त्वहं मुनीन् ।। (१.५८)

य एव नारदोऽत्रोभिहितः स एव प्रजापतीनामन्यतमः । तत्र मानवीयं वचनं द्रष्टव्यं यथा—

मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वसिष्ठं च भृगुं नारदमेव च ।। ( १।३५ ) इति ।

नारदस्य तथा मार्कण्डेयस्य विवरणादिकं यथाक्रमं Vettam Mani संगृहीते '*Purāṇic Encyclopaedia*' इत्याख्ये संग्रहग्रन्थे (English Edn. Delhi, 1975) पृः ५२६-५३० ; तथा ४८८-४८९ पृष्ठाङ्केषु द्रष्टव्यम् )

यदुक्तमत्र 'आयुर्ह्रासादल्पीयसी शक्ति र्मनुष्याणाम्' इति तत्र मानवीयानि वचनानि द्रष्टव्यानि यथा—

चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे ।
नाधर्मेणागमः कश्चिन्मनुष्यान् प्रति वर्त्तते ।। १।८१
इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः ।
चौरिकानृतमायाभि र्धर्मश्चापैति पादशः ।। १।८२
अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृते त्रेतादिषु ह्येषामायु र्ह्रसति पादशः ।। १।८३
वेदोक्तमायु र्मर्त्यानामाशिषश्चैव कर्मणाम् ।
फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम् ।। १।८४

अन्ये कृतयुगे धर्मा स्त्रेतायां द्वापरेऽपरे ।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ॥ १।८५
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहु र्दानमेकं कलौ युगे ॥ १।८६

'तत्रायमाद्यः श्लोकः'—इति यदुक्तं नारदेन तत्तु मनुसंहितायां प्रथमाध्यायस्य पञ्चमे तथा षष्ठे श्लोके उपलभ्यते यथा—

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ १।५
ततः स्वयम्भू र्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः ॥ १।६ इति ।

मूले 'सूत्रीयां मातृकां चकार' इति यदुक्तं तत्र टिप्पनीरूपेणाङ्गलभाषायां यल्लिखितं Jolly महोदयेन तदाकलनीयं प्रासङ्गिकं पाण्डित्योपेतञ्चेति कृत्वा—

'The *Mātṛkā* or 'Introduction', (Compare *Divyamātṛka,* a general introduction to the law regarding ordeals, in the *Mitākṣarā* on *Yāj,* II. 113) which is here attributed to Nārada, appears to have formed part of the abridgement in 12000 ślokas which was originally composed by him. It was composed in the *sūtra* style, i.e it was made up of aphorisms. The *ślokas* are frequently designed as *sūtras* by the commentators of law-books. Supposing the work to have consisted of twelve chapters, like the present Code of Manu, each chapter would have contained about 1000 slokas. The *Nāradasmṛti* actually has about 1000 ślokas. In the Code of Manu, forensic law is treated in the eighth and ninth chapters. The compiler of the present work declares his composition to be the ninth chapter of Nārada's abridged version of the Code of Manu. In the above enumeration of the twentyfour subjects treated in the original Code of Manu, judicial procedure is introduced as the seventh and eighth subject. This coincidence indeed might be accidental.'[1]

---

१। नेपालराष्ट्रे याः याः हस्तलिखितपुस्तिकाः नारदस्मृतेरुपलब्धाः ताः सर्वाः संगृह्य साम्प्रतिककाले National Archives इत्याख्यसंग्रहशालायां रक्षिताः, परीक्षिताश्च मया। अधुनापि अप्रकाशिते हस्तलिखितग्रन्थविवरणे पुस्तिकासंख्यायां ( ४८५-४८८ ) चतस्र स्ता उपलभ्यन्ते। तत्रैका ४८७ संख्यका पुस्तिका नारदस्मृतिरिति यद्यपि प्रमादवशाल्लिखिता तथापीदमवधेयं यत्तत्पुनः सा याज्ञवल्क्यस्मृतिः। अपरपुस्तिकायाः ( विशेषासंख्या-४३८ ) असम्पूर्णायाः अन्तिमे परिचायकत्वेन सन्निवेशितेऽशे लिखितम् 'इति मानवे न्यायशास्त्रे नारदप्रोक्तायां संहितायां न्यायधर्मपदानि समाप्तानि'।

४८५ संख्यकायां पुस्तिकायां ( विशेषसंख्या-४४० ) पत्राणि १०४। तत्र ग्रन्थारम्भ स्तावत्—

नमः सर्वज्ञाय ।
आसीदिदं तमोभूतं............चतुर्मुखः ।

इत्येवमपि ( धि ? ) कृत्य क्रमात् प्रकरणम्। तत्रेदं नवमं प्रकरणं व्यवहारो नाम यस्येमां देवर्षि र्नारदः सूत्रस्थानीयां मातृकांश्च ( च ? ) कारेत्यस्यामुखं—धर्मैकताना......

अन्तिमे —इति चौरप्रतिषेध नाम प्रकरणं समाप्तम्।

धर्मैकतानाः पुरुषा यदासन् सत्यवादिनः ।
तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः ॥ १
नष्टे धर्मे मनुष्याणां व्यवहारः प्रवर्त्तते ।
द्रष्टा च व्यवहाराणां राजा दण्डधरः स्मृतः ॥ २

---

The *Nāradīya-Manusaṁhitā* (to be abbreviated hereafter as N.M.S.) starts with the verse :

मनुः प्रजापति र्यस्मिन् काले राज्य मबूभुजत् ।
धर्मैकतानाः पुरुषा स्तदासन् सत्यवादिनः ॥१

**Note :** Vulg inserts the following verse :
लोकसंरक्षणार्थाय धर्मसंस्थापनाय च ।
राज्ञां दोषहरश्चैव व्यवहारः प्रकीर्त्तितः ॥

Verse : 2 ; Vulg : धर्मे नष्टे मनुष्येषु ; दृष्टा for द्रष्टा ।

---

**Eng. Trans. :** When persons were bent on being guided by religion alone (lit. bent on performing their duties) and were (habitually) veracious, there was neither any law-suit, nor hatred, nor selfishness.

The law-suits have been introduced when among mankind the (concept of) *dharma* (or dedication to duty) died out (dwindled) and the king has been regarded as the person to decide the law-suits and wielder of punishment.

---

**असहायकृत-भाष्यम् :** तत्र धर्मः श्रुतिस्मृत्युदितः शिष्टाचारलक्षणश्च । धर्मः एकतानो येषां ते धर्मैकतानाः । तानशब्दो बलवाची······ । तेन धर्मैकबला धर्मैकप्रधानाश्च पुरुषा यदा आसन्निति यदा अभवन् । तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः । तस्मिन् काले एषां त्रयाणामप्यसंभवहेतुरयमेव प्रथमः । धर्मस्य व्यवहारद्वेषमत्सरैः सह छायातप-विरोधः । यत्रातप स्तत्र न छाया यत्र छाया तत्र नातपः । यदा धर्म स्तदा न व्यवहार-द्वेषमत्सराः । यदा पुनरिमे तदा न धर्म इत्येतदर्थमेवेदमभिहितं भगवता नारदेन—

धर्मैकतानाः पुरुषा यदासन् सत्यवादिनः । तदा न व्यवहारोऽभून्नद्वेषो नापि मत्सरः । १॥

---

४८८ संख्यकायां पुस्तिकायां वैशिष्ट्य' तावदिदं यत्—
आदौ— 'नमो धर्मदेवाय ।' इत्युपक्रम्य—
'आसीदिदं तमोभूतं······चतुर्मुखः' इति सन्निवेशितः । ततः नातिसुस्पष्टतया अस्य श्लोकस्य अर्थः प्रदर्शितः । तदनन्तरम्—'इत्येवमारभ्य कर्मप्रकार ज्ञातव्यम् ।' तत्रैदं नवमं प्रकरणं व्यवहारो नाम यस्येमां देवर्षि र्नारदः सूत्रस्थानीयां चेतस्यामुखम् । ···अत्यशुद्धिपरिपूर्णेयं पुस्तिका । तत्र धर्मैकतानाः पुरुषा···' इत्यारभ्य नारदीयः यः श्लोकः सर्वनारदपुस्तिकायां वर्त्तते तन्नोपलभ्यते अत्र । तत्र नारदस्मृतेः व्याख्यानं नातिसुस्पष्टं नातिशुद्धञ्च दृश्यते । परन्तु न ग्रन्थादौ न वान्ते व्याख्याकर्त्तु र्नाम प्रदत्तम् । ग्रन्थान्ते लेखकख्यातिविस्तृतं परिचयादिकं प्रदत्तम् ।

**भवस्वामिप्रणीतं भाष्यम् :** सर्वो धर्मो वर्णाश्रमान्तरजानां स्मृतः । तस्य धर्मस्यार्थाधीनत्वात् कथं नाम निःश्रेयसाभ्युदयाभ्यां पुरुषाः संयुज्यन्तामिति भगवता नारदेन शास्त्रं प्रणीतमिति सम्बन्धः । मनुः प्रजापतिरित्यादि । निगदव्याख्यानो ग्रन्थः । धर्मैकताना धर्मैकविस्तारा धर्मैकव्यापारा: । अस्यैव अनुवादः सत्यवादिन इति । तदासन् । पुरुषा इति स्त्री पुः (सां ? सानां) ग्रहणम् । पुमां स्त्रिया इत्येकशेषः । तदा व्यवहारहेतुमत्सराद्यभावादधर्माभावान्नासीद्व्यवहारः ॥१॥

नष्टे धर्मे मनुष्येषु । कालदोषान्नष्टे । नाश (शब्द ?)श्चाधर्मानुबन्धः । मनुष्यग्रहणं देवनिवृत्त्यर्थम् । व्यवहारो न्यायोऽन्यायनिवृत्त्यर्थं स मन्वादिभिः शिष्टैः प्रवर्त्तितः । द्रष्टा च तस्य न्यायस्य राजा, अन्यायप्रवृत्तानां दण्डस्य धारयिता, सामर्थ्यात् स्वधर्मस्थानामनुग्राहकश्च कृतः ॥२॥

---

**नारदस्मृतितत्त्वप्रकाशिका :** नारदीय-मनुसंहितायां प्रथमश्लोके पाठान्तरमालोक्यते, तदाकलनीयं यथा— मनुः प्रजापति र्यस्मिन् काले राज्यमबूभुजत् ।
धर्मैकतानाः पुरुषा स्तदासन् सत्यवादिनः ॥ १

द्वितीये च श्लोके पाठान्तरं द्रष्टव्यं यथा—

नष्टे धर्मे **मनुष्येषु** व्यवहारः **प्रकल्पितः** ।
द्रष्टा च व्यवहाराणां राजा दण्डधरः **कृतः** ॥ २

पराशर-माधवे, स्मृतिचन्द्रिकायां, वीरमित्रोदय-व्यवहारप्रकाशे च बार्हस्पत्यमनुरूपं वचनमुल्लिखितं यथा—

धर्मप्रधानाः पुरुषाः पूर्वमासन्नहिंसकाः ।
लोभद्वेषाभिभूतानां व्यवहारः प्रवर्त्तितः ॥ ( बृहस्पतिस्मृतिः, १.१ )

अतिप्राचीने काले मनुष्याणां सुखादिकं बाहुल्येनासीदिति पाश्चात्त्यग्रन्थेष्वप्युपलभ्यते । द्रष्टव्यं तत्र—Plato in '*Laws*' (Book IV. p. 485 of the *Random House Edition*) : 'There is a tradition of the happy life of mankind in days when all things were spontaneous and abundant.'

मानवीयं वचनद्वयमत्राकलनीयं यत् कृते युगे धर्मस्य पूर्णतया विकाशः । उत्तरेषु युगेषु पुनः क्रमेण मानवानामधर्मे प्रवृत्तिरिति । तदुक्तं तत्र—

चतुष्पात् सकलो धर्मः सत्यं चैव कृते युगे ।
नाधर्मेणागमः कश्चिन्मनुष्यानुपवर्त्तते ॥ १.८१
इतरेष्वागमाद्धर्मः पादश स्त्ववरोपितः ।
चौरिकानृतमायाभिः धर्मश्चापैति पादशः ॥ १.८२

अस्य द्वितीयश्लोकस्य व्याख्याने मेधातिथि-भाष्यगतं वचनमनुधावनीयं यथा—

'कृतयुगादन्येषु युगेष्वागमाद्वेदाख्याद्धर्मः पादशः युगे युगे पादेनावरोपितो व्यपनीतः । अन्तर्हिता वेदशाखाः, पुरुषाणां ग्रहणावधारणशक्तिवैकल्यात् ।

महाभारते **शान्तिपर्वणि** भीष्मवचने अनुरूपं सङ्केतितं यथा—

नियत स्त्वं नरश्रेष्ठ शृणु सर्वमशेषतः ।
यथा राज्यं समुत्पन्नमादौ कृतयुगेऽभवत् ।। ५९.१३
नैव राज्यं न राजासीन्न दण्डो न च दण्डिकः ।
धर्मेणैव प्रजाः सर्वा रक्षन्ति च परस्परम् ।। ५९.१४
पालयाना स्तथान्योन्यं नरा धर्मेण भारत ।
खेदं परममाजग्मु स्तत स्तान्मोह आविशत् ।। ५९.१५
ते मोहवशमापन्ना मानवा मनुजर्षभ ।
प्रतिपत्तिविमोहाच्च धर्म स्तेषामनीनशत् ।। ५९.१६
नष्टायां प्रतिपत्तौ तु मोहवश्या नरा स्तदा ।
लोभस्य वशमापन्नाः सर्वे भारतसत्तम ।। ५९.१७

* * * *

नष्टे ब्रह्मणि धर्मे च देवा स्त्रासयथागमन् ।
ते त्रस्ता नरशार्दुल ब्रह्माणं शरणं ययुः ।। ५९.२२

**ऋग्वेदीयसूक्ते** दशममण्डलगते (१०.१०.१०) अपि युगान्तरेषु नैतिकावनतिः क्रमात् सङ्केतितेति कथयितुं शक्यते । तथाह्युक्तम्—

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ।
उप बर्बृहि वृषभाय बाहु मन्यमिच्छस्व सुभगे पतिं मत् ।

सायणाचार्य्यकृता व्याख्या यथा—

स्मर्त्तव्यमत्र यदथर्ववेदे सङ्केत उपलभ्यते यद्राजा प्रजाभिः नृपत्वेन वृत इति । इदं तु नारदवचने 'कृतः' इति पाठस्यानुकूलत्वेनाकलनीयम् । तथाहि अथर्ववेदे-३.४२—

'त्वां विशो वृणतां राज्याय त्वामिमाः प्रदिशः पञ्च देवीः ।'

अन्यच्च— ये राजा नो राजकृतः सूता ग्रामण्यश्च ये ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान् ।। ३.५.७

कौटिलीयेऽर्थशास्त्रे प्रजाकर्त्तृकं राजकरणं स्पष्टतया उल्लिखितं यत्—'मात्स्यन्यायाभिभूताः प्रजाः मनुं वैवस्वतं राजानं चक्रिरे' इति (अ. शा, १.१३.५) । अर्वाचीनेऽपि काले रक्षार्थं प्रजाभिः राज्ञः वरणं सञ्जातमिति शिलालिप्यामुपलभ्यते । तथा हि क्षत्रपः रुद्रदामन् सौराष्ट्रजानपदैः पतित्वे वृतः इति ज्ञातं सर्वेषाम् । तदुक्तं—

आ गर्भात् प्रभृत्यविहतसमुदितराजलक्ष्मीधारणगुणतः सर्ववर्णैरभिगस्य रक्षणार्थं पतित्वे वृतेन आ प्राणोच्छ्वासात् पुरुषवधनिवृत्तिकृतसत्यप्रतिज्ञेनान्यत्र संग्रामेषु...... ।

(*E. I.* Vol. VIII, p. 36. at p. 40)

गोपालाख्यं राजानमधिकृत्यापि शिलालिपि वर्त्तते—तदूहनीयं यथा—

मात्स्यन्यायमपोहितुं प्रभृतिभि र्लक्ष्याः करं ग्राहितः श्रीगोपाल इति क्षितीशशिरसां चूडामणिस्तत्सुतः ।। (*E. I.* Vol. IV, p. 243. at p. 248)

अन्यान्यैतिहासिकोदाहरणानि अनुसन्धेयानि । आकरभूताः खलु ग्रन्थाः— *Beal, Buddhist Records of the Western World,* 1884, Vol. I, pp. 210-216 ; C. Minaksi, *Administration and Social life under the Pallavas,* 1938, p. 38.

यदुक्तं नारदेन राज्ञः दण्डधरत्वं तत्रेदं वक्तव्यं यत् कौटिल्येनापि 'दण्डधर' इति पदस्य प्रयोगः विहितः यथा—

बलीयानबलं हि ग्रसते दण्डधराभावे । स तेन गुप्तः प्रभवतीति ।

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्त्तते स्वेषु वर्त्मसु ।। १.५.१४-१६ ।

भगवता मनुना तद्ग्रन्थस्य सप्तमे अध्याये—'राजधर्मान् प्रवक्ष्यामि यथावृत्तो भवेन्नृपः'—(७।१) इत्युपक्रम्य राजोत्पत्तिकथनादनन्तरं दण्डोत्पत्ति र्बाहुल्येनोपवर्णिता । उक्तं तेन—

तदर्थं सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत् पूर्वमीश्वरः ।। (७.१४)
स राजा पुरुषो दण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ।। (७.१७)

'प्रतिभू' पदस्य रूपकविश्लेषणं विहितं मेधातिथिना—
—यथा प्रतिभू श्चलितुं न ददाति तद्वद्दण्डोऽपि—इत्यनेन ।

मानवीयानि वचनान्तराण्यतोल्लेख्यानि यथा—

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदु र्बुधाः ।। (७.१८)

तद्दण्डस्य समीक्ष्य प्रणयने प्रजानां सर्वथा गुप्तिः, असमीक्ष्य प्रयोगे च विनाशः इति स्पष्टतः प्रतिपादितं मानवीये श्लोके यथा—

समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ।। (७.१९)

मात्स्यन्यायावतारः दण्डप्रयोगाभावे इति अर्थशास्त्रे निर्देशितमुल्लिखितञ्च प्राक् । यच्च शान्तिपर्वणि महाभारते भाषितं—

दण्डश्चेन्न भवेल्लोके विनश्येयु रिमाः प्रजाः ।
जले मत्स्यानिवाभक्ष्यन् दुर्बलान् बलवत्तराः ।। (१५.३०)

(अन्यच्च तत्रैव, ६७.१६) ; तदनुरूपं मानवे धर्मशास्त्रे—

यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः ।। (७.२०)
अद्यात् काकः पुरोडाशं श्वावलिह्याद्धवि स्तथा ।
स्वाम्यं च न स्यात् कस्मिंश्चित् प्रवर्त्तेताधरोत्तरम् ।। (७.२१)
सर्वो दण्डजितो लोको दुर्लभो हि शुचि र्नरः ।
दण्डस्य हि भयात् सर्वं जगद्भोगाय कल्पते ।। (७.२२)

मेधातिथिपादेनानुरूपतया श्रुतिरुद्धृता यथा—

भयात् सूर्य्यः प्रतपति भयात्तपति चन्द्रमाः ।
भयादग्निश्च वायुश्चेति ।। (मनु, ७.२३ आश्रित्य)

मनुना युक्तमेवात्र प्रकल्पितं यत् दण्डप्रणयनं समीक्ष्यकारिणा कर्त्तव्यमन्यथा महती विनष्टिः । तदुक्तं तत्र—

तस्याहुः सम्प्रणेतारं राजानं सत्यवादिनम् ।
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् ।। (७.२६)
तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्धते ।
कामान्धो विषमः क्षुद्रो दण्डेनैव निहन्यते ।। (७.२७)
सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना ।
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ।। (७.३०)
शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा ।
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता ।। (७.३१)

कौटियीयं वचनं पूर्वमुल्लिखितं किञ्चिदत्र पुनराधिक्येन दण्डमधिकृत्योपस्थाप्यते यत्—'आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः । तस्य नीति र्दण्डनीतिः अलब्धलाभार्था लब्धपरिरक्षणी रक्षितवर्धनी वृद्धस्य तीर्थे प्रतिपादनी च । तस्यामायत्ता लोकयात्रा । (१.४.३-४) ।

दण्डप्रणयने का नाम नीतिरवलम्बनीयेति पूर्वाचार्य्यवचनमुद्धृत्यालोचितमर्थशास्त्रे यथा—'तस्माल्लोकायात्रार्थी नित्यमुद्यतदण्डः स्यात् । न ह्येवंविधं वशोपनयनमस्ति भूतानां यथा दण्डः'—इत्याचार्य्याः । (१.४.५-६)

नेति कौटिल्यः । तीक्ष्णदण्डो हि भूतानामुद्वेजनीयो भवति । मृदुदण्डः परिभूयते । यथार्हदण्डः पूज्यते । (१.४.७-१०)

अन्यदपि तत्रैव—

सुविज्ञातप्रणीतो हि दण्डः प्रजा धर्मार्थकामै र्योजयति । दुष्प्रणीतः कामक्रोधाभ्यामवज्ञानाद्वा वानप्रस्थपरिव्राजकानपि कोपयति, किमङ्ग पुन र्गृहस्थान् । अप्रणीतस्तु मात्स्यन्यायमुद्भावयति । (१.४.११-१३)

अन्यत्र चार्थशास्त्रे तेनैव भाषितम्—

दण्डो हि केवलो लोकं परं चेमं च रक्षति ।
राज्ञा पुत्रे च शत्रौ च यथादोषं समं धृतः ।। ३.१.४२

बार्हस्पत्यानि वचनानि उल्लेख्यान्यत्र यथा—

तेजोमात्रं समुद्धृत्य राज्ञो मूर्त्ति र्हि निर्मिता ।
तस्य सर्वाणि भूतानि चराणि स्थावराणि च ।। १.७
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति हि ।
नाराजके कृषिवणिक्कुसीदपरिपालनम् ।। १.८
तस्माद्वर्णाश्रमाणां तु नेतासौ निर्मितः पुरा ।। १.९[a]

112394
16/10/2003

नृपाणां 'राजा' इति शब्देन निर्देशः प्रायेणैवालोक्यते। ऋग्वेदारभ्य 'राजन्' इति पदस्य तस्मिन्नेवार्थे प्रयोगः। दिङ्मात्रमत्र यथा—७.६४.२, मित्रं वरुणञ्चोद्दिश्य ; केवलं वरुणमुद्दिश्य १.२४. १२, ३ ; १०.१७३, ५। ऋग्वेदस्य अष्टमे मण्डले, (८.२१.१८) चित्रस्य राजत्वमुपवर्णितं—

चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु।
पर्जन्य इव ततनद्धि वृष्ट्या सहस्रमयुता ददत्॥

तत्र (६.६८.९) वरुणस्य ; (८.१६.१) इन्द्रस्य विशेषणत्वेन 'सम्राज्'-पदस्य प्रयोगः। (१.२५.१०)। 'साम्राज्य'मिति पदमपि प्रयुक्तं वरुणदेवमुद्दिश्य। इन्द्रः वर्णितः 'एकराट्' इति रूपेण (८.३७.३)। ऋग्वेदस्य सप्तमे मण्डले (७.८३.७-८) उल्लिखितमिदं यद्दश-संख्यकाः राजानः सुदासाभिधेयं राजानं पराक्रमेण वशीकर्त्तुं न शेकुरिति—

दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः।
दाशराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणावशिक्षतम्।

अथर्ववेदे 'अधिराज' इति पदस्य उल्लेखः इन्द्रमुद्दिश्य यथा—

इन्द्रो जयति न परा जयाता अधिराजो राजसु राजयातै (६.९८.१)। ऋग्वेदेऽपि तथैव—वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् (ऋः, १०.१२८.९)।

यथा ऋग्वेदे (१०.३४.८) तथाथर्ववेदेऽपि (३.४.३) 'उग्र' इति पदं यत् प्रयुक्तं तस्यार्थस्तु राजा इति।

ऐन्द्राभिषेके यदुच्चार्य्यते तेनैव मन्त्रेणाधिपत्यादिकं राज्ञां सङ्केतितं यथा—स य इच्छेदेवंवित्क्षत्रियमयं···सर्वां ल्लोकान्विन्देतायं सर्वेषां राज्ञां श्रैष्ठ्यमतिष्ठां परमतां गच्छेत साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सर्वायुष अन्तोदा परार्धात् पृथिव्यै समुद्रपर्य्यन्ताया एकरालिति तमेतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वाभिषिञ्चेत्। (ऐतरेये ब्राह्मणे, ३९.१)।

द्रष्टव्यान्यत्र विशेषतः सर्वेषामृग्वेदादारभ्य उत्तरेषु कालेषु उल्लिखितानां राज्ञां नाम-निर्देशात्मकानि पत्राणि (पृः १७-२१) Dr. N. N. Law-विरचिते—'Aspects of Ancient Indian Polity' इत्याख्ये ग्रन्थे।

राज्ञां प्रजारक्षणं मुख्यकर्तव्यत्वेनोपदिष्टं शास्त्रेषु यथा मानवे धर्मशास्त्रे सप्तमेऽध्याये—

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्॥ (७.२)
अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः॥ (७.३)
स्वे स्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः।
वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता॥ (७.३५)

मार्कण्डेयपुराणे स्पष्टमेवोद्घोषितं यद्राज्ञः शरीरधारणं प्रजापालनरूपधर्म्पार्थमेव। उक्तं तत्र—

राज्ञां शरीरग्रहणं न भोगाय महीपते।
क्लेशाय महते पृथ्वी-स्वधर्मपरिपालने ॥ (१३०, ३३-३४)

प्रजादिरक्षणे तत्परो न भवेच्चेद्राजा अधर्माशङ्का भवेदिति रामायणे भाषितम्—

अधर्मः सुमहान्नाथ भवेत्तस्य महीपतेः।
यो हरेद् बलिषड्भागं न च रक्षति पुत्रवत् ॥ (अरण्यकाण्डे, ६.११)

शान्तिपर्वणि महाभारते यदुक्तं तदप्यूहनीयमत्र—

यथा हि गर्भिणी हित्वा स्वं प्रियं मनसोऽनुगम्।
गर्भस्य हितमाधत्ते तथा राज्ञाप्यसंशयम् ॥
वर्त्तितव्यं कुरुश्रेष्ठ सदा धर्मानुवर्तिना।
स्वं प्रियं तु परित्यज्य यद्यल्लोकहितं भवेत् ॥ (५६.४५-४८)

राज्ञः कर्त्तव्यादिकमुपलक्ष्य बार्हस्पत्यं वचनं द्रष्टव्यं यथा—

तत् प्रजापालनं प्रोक्तं त्रिविधं न्यायवेदिभिः।
परचक्राच्चौरभयाद् बलिनोऽन्यायवर्त्तिनः।
परानीकस्तेनभयमुपायैः शमयेन्नृपः।
बलवत्-परिभूतानां प्रत्यहं न्यायदर्शनैः। १-३९-४०

वसिष्ठेन प्रजारक्षणं यावज्जीवसत्रत्वेन परिकल्पितम् (१९. १-२)। भारते शान्तिपर्वणि चारुतयोपन्यस्तं यत्तथैव निवेद्यते—

भूमिरेतौ निगिरति सर्पो बिलशयानिव।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ (२३.१५)

व्यवहारदर्शनं राज्ञः कर्त्तव्यत्वेन नारदेन यथा प्रकीर्णके प्रदर्शितं तथैव मनु-याज्ञवल्क-प्रभृतिभिरुद्घोषितं। तथा च नारदवचनम्—

तस्य धर्मः प्रजारक्षा वृद्धप्राज्ञोपसेवनम्।
दर्शनं व्यवहाराणामुत्थानं च स्वकर्मसु ॥ (प्रकीर्णके, ६३)

याज्ञवल्क्यस्मृतौ आचाराध्याये—

व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहम्। (१.३६०)

व्यवहाराध्यायेऽपि—

व्यवहारान् नृपः पश्येद्विद्वद्भिः ब्राह्मणैः सह। (२.१)

मनुस्मृतौ अष्टमेऽध्याये—

व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः।
मन्त्रज्ञैः मन्त्रिभि श्चैव विनीतः प्रविशेत् सभाम् ॥ (८.१)

इत्युपक्रम्य व्यवहारदर्शने किमाचारेण राज्ञा भवितव्यमिति प्रपञ्चितम्। मेधातिथिना तद्भाष्ये प्रजापरिचालनस्य व्याख्याने प्रदर्शितं यत् 'परिपालनं नाम पीड़ापहारः। द्वयी च

पीड़ा दृष्टाऽदृष्टा च । तत्र दुर्बलस्य बलीयसा धनहरणादिना बाध्यमाना दृष्टा पीड़ा । इतरस्य तु विध्यतिक्रमजनितेन प्रत्यवायेनामुत्रिकदुःखोत्पादनमदृष्टपीड़ा...अतो राज्यस्थित्यर्थं व्यवहारदर्शनं कर्त्तव्यमिति॰ ।

मिताक्षराव्याख्यानमन्यत्रानुसन्धेयम् यथा—अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः । तच्च दुष्टनिग्रहमन्तरेण न सम्भवति । दुष्टपरिज्ञानं च न व्यवहारदर्शनमन्तरेण सम्भवति । तद्व्यवहारदर्शनमहरहः कर्तव्यमित्युक्तं व्यवहारान्···अन्वहम् इति ।

---

**लिखितं साक्षिण श्चैव द्वौ विधी परिकीर्त्तितौ ।**
**संदिग्धार्थविशुद्ध्यर्थं द्वयो विवदमानयोः ॥ ३**

NMS सम्प्रवर्तितौ ; Vulg. चाव ; सम्प्रकीर्त्तितौ

**Eng. Trans.** In the case where two parties quarrel with one another, documents and witnesses have been declared (by the Śāstrakāras) as the methods for the ascertainment of facts in the doubtful matters.

**असहायकृत-भाष्यम्** । अत्र वादि-प्रतिवादिनोः परस्परं विवदमानयोरेकतरस्यापि दोषेण योऽर्थः सन्दिग्धो भूतः, तस्य सन्दिग्धार्थस्य विशुद्ध्यर्थं स्फुटीकरणार्थं लिखितं साक्षिणश्चैव द्वावेव विधी मुनिना प्रकीर्तितौ ॥ ३ ।

**भवस्वामिप्रणीतं भाष्यम्**—लिखितं साक्षिणश्च तस्य न्यायाख्यस्य व्यवहारस्याङ्गं, याभ्यां परिच्छिद्यते व्यवहारः । तावत्र द्वौ विधी सम्प्रवर्तितौ, लिखितं साक्षिणश्च । तावुत्तरत्र विशेष्येते इति प्रयोजनमाह—'सन्दिग्धार्थविशुद्ध्यर्थ'मिति । सन्दिग्धश्चासावर्थश्च सन्दिग्धार्थः, तस्य विशुद्धिः निर्णयः तदर्थम् । नार्थः सन्दिह्यते । तद्विषये प्रमाणानुपलब्धौ पुरुषस्य संशयप्रत्यय उत्पद्यते तन्निमित्तत्वादर्थः सन्दिग्ध उच्यते । स च प्रमाणेन निर्णयप्रत्यय उत्पन्ने विशुद्ध उच्यते । परमार्थत एकरूप एव सः । न तस्य शुद्ध्यशुद्धी स्तः । द्वयोरिति । यद्यपि द्वयो र्बहूनां च भवति, द्व्यधिष्ठानत्वात् विवादस्य 'द्वयो'रित्युक्तम् ॥ ३ ।

**नारदस्मृतितत्त्वप्रकाशिका** । याज्ञवल्क्येन निर्णयार्थं प्रमाणचतुष्टयं निर्दशितं यथा—

प्रमाणं लिखितं भुक्तिः साक्षिण श्चेति कीर्त्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥ २।२२.

व्याख्यातं मिताक्षरायां—प्रमीयते परिच्छिद्यतेनेति प्रमाणम् । तच्च द्विविधम् मानुषं दैवं चेति । तत्र मानुषं प्रमाणं त्रिविधं लिखितं भुक्तिः साक्षिणश्चेति ।
विष्णुस्मृतौ समयक्रियया च सह तिस्रः भावनाः उल्लिखिताः यथा—

तस्य च भावना स्तिस्रो भवन्ति लिखितं साक्षिणः समयक्रिया च । ( ६।२३ ) ।

व्याख्यातं नन्दपण्डितेन केशववैजयन्त्यां—विभावनासाधनान्याह् । भाव्यते साध्यते विप्रतिपन्नोऽर्थोऽनयेति भावना, प्रमाणपद्धतिः ।

कात्यायनेनास्मिन् विषये वचनद्वयमुल्लिखितं द्रष्टव्यम्—

लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम् । का, २४२ ।

अन्यत्र तेनैवोक्तं—लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं विदुः । का, २१४ ।

बार्हस्पत्यं वचनं तत्र—

द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा ।
एकैकाऽनेकविधा भिन्ना ऋषिभि स्तत्त्ववेदिभिः ।। ४.६
साक्षिणो लिखितं भुक्ति र्मानुषं त्रिविधं स्मृतम् ।
धटाद्या धर्मजान्ता तु दैवी नवविधा क्रिया ।। ४.७
साक्षिलेख्यानुमानञ्च मानुषी त्रिविधा क्रिया । ४.८

प्रमाणान्यन्यान्यपि नारदेनाङ्गीकृतानीति उत्तरत्र स्पष्टीभविष्यति ।

---

**सोत्तरोऽनुत्तर श्चैव स विज्ञेयो द्विलक्षणः ।**
**सोत्तरोऽभ्यधिको यत्र विलेखापूर्वकः पणः ।। ४**

---

° श्चेति, स्मृतिचन्द्रिका, p. 21 ; विलेखात्, व्यवहारप्रकाश, p. 5.

---

**Eng. Trans.**—Those (legal procedures) are of two varieties according as they are attended by a wager (*Sottara*) or not attended by the same. The lawsuit is to be (regarded as) attended by wager wherein (either of the two parties) stakes in writing a certain sum which is to be paid in addition to the sum in dispute (presumably in case of defeat).

---

**असहाय-भाष्यम्**—अस्य भाष्यम् । व्यवहार इत्यनुवर्त्तते । व्यवहार एक एव सोत्तरो अपरो अनुत्तर इति द्विलक्षणो ज्ञेयः । सोत्तरलक्षणं चास्यैव श्लोकस्योत्तरार्धेन व्याख्यातम्, 'सोत्तरोऽभ्यधिको यत्र विलेखापूर्वकः पण' इति । अत्र च व्यवहारस्य सोत्तरत्वे पणाधिक्यं केचिदपरिज्ञानादेव ब्रुवते । यत् किल लभ्यद्रव्यादधिकः पणो यत्र भवति, स एव सोत्तर उच्यते । यत् पुन र्लभ्यद्रव्यादधिकः पणो न भवति सोऽनुत्तर इति । तदिदमसमञ्जसं वचनम् ।...किं तर्ह्यत्रमुनिनारदान्तर्गतभावार्थोऽयमेवैष्वेवाक्षरेषु लक्ष्यते । यदेकं तावल्लभ्यद्रव्यं व्यवहारसन्देह एव स्थितं तिष्टत्येव । द्वितोयं पुनरिदं यदमर्षितो वादी प्रतिवादी वा एवम्विधप्रभूतद्रव्यव्यवहारेऽपि शतद्वयमात्रं शतैकमात्रं वार्धशतमात्रमपि यावन्निजविभवानुसारेण द्रव्यमुपन्यस्यति स एवाभ्यधिको पणो दरिद्रस्य । अतः पणाधिक्यमेतद्द्वितीयद्रव्योपन्यास एव द्रष्टव्यम् । न पुनरनवस्थाप्रसङ्गो द्रव्याधिक्यविषय इति । तथा चोक्तमेवान्यैरपि च—

वादी वा प्रतिवादी वा यः समर्थः स्वतारणे ।
द्रव्यं वित्तानुसारेण करोति स पणः स्मृतः ।।

अथवा किमन्येनायमभ्यधिको पणशब्दः प्रशंसायामेव संबध्यते । यथा समस्तयुक्तव्यवहाराणां

मध्ये स एवाभ्यधिको व्यवहारो यत्र विलेखापूर्वकः पणः इति । यथोक्तम् । सोऽपि पणो यदि विलेखापूर्वको भवति तदा सोत्तरो व्यवहार उच्यते । अन्यथा पुनरनुत्तर एव । अस्य निगमः । लेखा लेखनम् । विशेषेण लेखा विलेखा । तत्पूर्वकः पणः कर्त्तव्य इति । अत्रापि मुनि-भावार्थोऽयम् । यदि विलेखालेखिताक्षरनिबन्धपूर्वः पणो भवति तदा सोत्तरो व्यवहारोऽसौ । यदि पुनर्वाङ्मात्र एवानिबद्धाक्षरो मुक्तवचनैः जल्पित एव न चाक्षरैः निबद्ध स्तदा स पणः कृतोऽपि अकृतवद्द्रष्टव्यः । यतोऽनक्षरैः निबद्ध स्तदा स पणः कृतोऽपि अकृतवद्द्रष्टव्यः । यतो ऽनक्षरैः निबद्धः पणो निर्णयकाले व्यभिचरत्येव । इति । इदानीं सोत्तरनिर्णय उच्यते ।। ४ ।

---

**भवस्वामिकृत-भाष्यम्**—स व्यवहारो द्विलक्षणः, सोत्तरोऽनुत्तरश्च । एव-शब्दः प्रकारान्तराभावार्थः ।सहोत्तरेण सोत्तरः । अविद्यमानोत्तरोऽनुत्तरः । सोऽनन्तरं विशेष्यते । तदर्थमुत्तरं तावत् ब्रवीति इति अभ्यधिकः । यस्मिन् व्यवहारे । लेखा अक्षरविन्यासः । शास्त्रविगता लेखा यस्याः, विलेखा इच्छा । तत्पूर्वको विलेखापूर्वकः । न शास्त्रकृतः, स्वेच्छाकृत इत्यर्थः । एतेन पणेनोत्तरेण सोत्तरः । अर्थादस्याभावोऽनुत्तरः इति भवति ।। ४ ।

---

**नारदस्मृतितत्त्वप्रकाशिका**—व्यवहारभेदं चिकीर्षु र्नारदः पणादिवशात् भेदं दर्शयितु-माह 'सोत्तरोऽनुत्तर'श्चेति । पणः प्रतिज्ञा । व्यवहारस्य उत्तरयुक्तत्वेन उत्तरहीनत्वेन भेदद्वयम् । तत्राद्ये सोत्तराभिधेये व्यवहारे पत्रलिखनपूर्विका प्रतिज्ञा विधीयते—'यदि पराजयेऽहं तदा पराजयदण्डाभ्यधिकतममेतावद्राज्ञे दास्यामी'ति । यत्र एवम्विधा प्रतिज्ञा न वर्त्तते तदा व्यवहारः उत्तररहितत्वादनुत्तर इत्यभिधीयते । देवणभट्टेन स्मृतिचन्द्रिकायां व्यवहारकाण्डे अस्य व्याख्या विहिता यथा—प्रतिज्ञाविलेखनात् पूर्वं यत्र व्यवहारे दण्डादभ्यधिकः पणः उभाभ्यामुपेयते अन्यतरेण वा स सोत्तरो व्यवहार इत्यर्थः । (पृ: २१) प्रसङ्गतः याज्ञवल्क्यीयं वचनमत्रोल्लेख्यं यथा—

सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत् । दण्डं च स्वपणं चैव धनिने धनमेव च ।। (२।१८)

विज्ञानेश्वरेण मिताक्षरायां प्रपञ्चितं यत्—यदि विवादो व्यवहारः सपणः, पणनं पणः तेन सह वर्तते इति सपणः स्यात्तदा तत्र तस्मिन् सपणे व्यवहारे हीनं पराजितं पूर्वोक्तं दण्डं स्वकृतं पणं राज्ञे, अर्थिने च विवादास्पदीभूतं धनं दापयेद्राजा । यत्र पुनरेकः कोपावेशवशात् 'यद्यहं पराजितो भवामि तदा पणशतं दास्यामि' इति प्रतिजानीते, अन्यस्तु न किञ्चित् प्रति-जानीते तत्रापि व्यवहारः प्रवर्त्तते ।

द्रष्टव्यमत्र—R. Lariviene, 'The judicial wager in Hindu Law', in the Annals of B.O.K.I, Vol. LXII, Poona, 1981, pp. 135-145.

---

**विवादे सोत्तरपणे द्वयो र्य स्तत्र हीयते ।**
**स एव हि पणं दाप्यो विनयं च पराजये ।। ५ ।**

---

स पणं सुकृतं—B b B c ; स पणं स्वकृतं—L. The latter reading is mentioned as a vl. in the commentary ; N.M.S., स पणं स्वकृतं ।

**Eng. Trans.**—In a dispute (law-suit) conditioned by wager (*sottararpaṇa*) the party who is defeated (cast) must be made to pay his stake and (an additional) fine when his defeat (is declared).

---

**असहाय-भाष्यम्**—अत्र तावत् पणोपन्यास एव निरूप्यते । येन धनिकेनर्णिकपार्श्वे द्रव्यं लभ्यं तेन द्रव्यप्रार्थनमात्रैव भाषा करणीया... । तदा भाषायामधिकप्रार्थनादोषः । अतो यदा प्रतिवादी सत्यार्थेऽपि तस्य मिथ्योत्तरं ददाति तदा धनी स्वसत्यावष्टम्भखरीकरणार्थं मृणिकस्यामर्षादधिकद्रव्यवाहनार्थञ्च तृतीयपादे स्थितः पणमुपन्यस्य क्रियोपन्यासमपि करोति तदा एष वादिनः क्रियोपन्यासकालः । प्रतिवाद्यपि यदा सन्तमेवाभियोगं दत्तमात्मनो जानाति तदा भाषानन्तरमेव मिथ्योत्तरं दत्त्वा तस्यैवोत्तरस्यावष्टम्भनिश्चयार्थं वादिनः स्वामर्षाद... द्रव्यवाहनार्थं पणोपन्यासं करोति एष प्रतिवादिनः पणोपन्याकालः । अत्र च यः पणो वादि-प्रतिवादिनोरेकतरेणापि रोषामर्षादुपन्यस्तः स सोत्तरशब्देनोच्यते । तेन सह यो वादः स सोत्तरपणः । तस्मिन् विवादे सोत्तरपणे य एव कश्चिद्धीयते अवसायं प्राप्नोति स एव हि पराजयेण मिथ्यावादित्वाद्द्विगुणं तत्र राज्ञात्मने दाप्य इति । **अत्र श्लोके केचित् पाठान्तरं पठन्ति । यथा-'स पणं स्वकृतं दाप्य** इति । एवमप्यत्र न किञ्चिद्दुष्यते ।। ५ ।

---

**भवस्मामिकृतभाष्यम्**—सोत्तरस्य विशेष उच्यते । विवादे सोत्तरपणे । विरुद्धो वादो विवादः अन्योऽन्यथा ब्रवीति । अन्य श्चान्यथा । द्वयोः सोत्तरपणयो र्य स्तत्र हीयते, पराजीयते स पणं स्वकृतं दाप्यः । येन दश कृतं स दश, येन विंशतिः स विंशति (रि ? मि)ति । किञ्च विनयं च पराजये । तस्मिन् व्यवहारे पराजये यः शास्त्रोक्तो दण्डः तं च । एकस्य सोत्तरपणत्वेऽप्यनेनैव गतार्थत्वान्नोक्तम् ।

---

**नारदस्मृतितत्त्वप्रकाशिका**—अत्रादौ याज्ञवल्क्यीयं वचनमुल्लिख्य तत्र विज्ञानेश्वर-कृतायां मिताक्षराभिधेयायां टीकायां यद्व्याख्यानं विहितं तदेवात्रापि प्रासङ्गिकतया निर्देश्यम् । तथाहि याज्ञवल्क्यवचनम्—

सपण श्चेद्विवादः स्यात्तत्र हीनं तु दापयेत् ।
दण्डं च स्वपणं चैव धनिने धनमेव च ।। (२.१८)

टीका—अपि च, यदि विवादो व्यवहारः, सपणः, पणनं पणः । तेन सह वर्तत इति सपणः, स्यात्तदा तत्र तस्मिन् सपणे व्यवहारे हीनं पराजितं पूर्वोक्तं दण्डं स्वकृतं पणं राज्ञे, अर्थिने च विवादास्पदीकृतं धनं दापयेद्राजा । यत्र पुनरेकः कोपावेशवशात् 'यद्यहमत्र पराजितो भवामि तदा पणशतं दास्यामि—इति प्रतिजानीते, अन्यस्तु न किञ्चित् प्रतिजानीते तत्रापि व्यवहारः प्रवर्तते । तस्मिंश्च प्रवृत्ते पणप्रतिज्ञावादी यदि हीयते तदा स एव सपणं दण्डः दाप्यः । अन्यस्तु पराजितो दण्डं दाप्यः, न पणम्, 'स्वपणं' चेति विशेषोपादानात् । यत्र त्वेकः शतम्, अन्यस्तु पञ्चाशतं प्रतिजानीते तत्रापि पराजये स्वकृतमेव पणं दाप्यौ । 'सपणश्चेद्वि-वादः स्यात्' इयि वदता पणरहितोऽपि विवादो दर्शित इति ।

विश्वरूपविरचिता बालक्रीड़ा अत्रानुसन्धेया यथा—

'दण्डस्वपणौ राज्ञे देयौ स्वतः पणः स्वपणः, यो धनिना व्यवहारं परावर्तयितुं पणः

कृतः इत्यर्थः । धनं तु धनिन एव राजा दापयेत् । चशब्दो धिग्दण्डादिसमुच्चयार्थः । एवं तावत् साक्षिसङ्करे नियम उक्तः । ललाटस्वेदादिलिङ्गसङ्करे कथम् । तत्राप्यनुमानमूलत्वाल्लैङ्गिकादिस्मृतीनां सम्यगनुमाननिरूपणाधीन एव व्यवहारनिर्णयः ।

(*Yājñavalkyasmṛti.* Ed. Mm. T. Gaṇapati Śāstrī, Second edition, 1982, Delhi ; First edition Trivandrum, 1921-22)

Julious Jolly-महोदयकृतं नारदस्मृतेः आङ्ग्लभाषायामनुवादप्रसङ्गतः टिप्पन्यां यदभिहितं तदत्र यथायथमुल्लेख्यम्—

'According to Asahāya, the wager must not be laid till the first two stages of the trial, the charge and the answer, are over. The wager may be laid either by the plaintiff or by the defendant. The plaintiff, whose declaration has been refuted by the defendant stakes a certain sum on the issue of the case. Or the defendant after having denied the correctness of the charge stakes a certain sum on the correctness of his own statements, to be proved by the issue of the case. Asahāya does not say to whom the sum staked has to be paid in his opinion. If may be observed that, according to Burmese law which is an offshoot of the early law of India, ten per cent of the sum staked should be given to the judge and to the pleaders and the remainder to the victorious party. See Richarson's *Dhammathat*, p. 73. (*The Minor Law-Books*, pt. I, Nārada-Brhaspati—Tr. by Julius Jolly, in the *Sacred Books of the East*, XXXIII ; Second Indian Reprint, 1965, 1969, 1977. New Delhi : First published in Oxford, 1889).

---

**सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।**
**तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत् ॥ ६ ।**

---

**Eng. Trans.**—The plaint has been declared to be the essential part of a proceeding-at-law. The defendant (*vādī*) loses the suit if the plaint is lost (not established). He may gain the suit if he can prove the charge.

---

**असहाय-भाष्यम्**—तथा चोक्तम्—

यत्र वादी क्रियाकाले सर्वसिद्धिमुदीरयेत् ।
दिव्येन तां खरीकुर्वन् सा प्रतिज्ञा प्रकीर्त्तिता ॥ ६ ।

---

**भवस्वामि-भाष्यम्**—प्रधानं व्यवहाराणां प्रतिज्ञोक्ता । तद्धानौ हानिरन्यथाभावः । अन्यथोक्तेऽन्यथाभावे पराजीयते । यथोक्तं—'प्रतिज्ञां निर्वहञ् जयति, तस्मात् सुपरीक्ष्य प्रतिज्ञा कर्त्तव्या, तन्मूलत्वात् सर्वस्येति' ॥ ६

**नारदस्मृतितत्त्वप्रकाशिका**—व्यवहारमार्गे चतुरंशपरिकल्पनया चतुष्पाद्व्यवहारः इति याज्ञवल्क्येन निर्दिशितः—'चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः'—(२।८) इत्यनेन। 'स्मृत्याचार-व्यपेतेन मार्गेणाधर्षितः परैः। आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ।। ( २.५ ) इति यदुक्तं तेन तत्र विश्लिष्य दर्शनद्वारेण प्रपञ्चितं—

प्रत्यर्थिनोऽग्रतो लेख्यं यदावेदितमर्थिना।
समामासतदर्धाहर्नामजात्यादिचिह्नितम् ।। ( २।६ ) इति।

तट्टीकायां मिताक्षराभिधेयायां स्पष्टतः अभिहितं यद् 'भाषा', 'प्रतिज्ञा' 'पक्ष' इति नार्थान्तरम्। तत्र भाषास्वरूपज्ञापकानि वचनान्यपि तत्रोदाहृतानि यथा—

अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलम्।
साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च ।।
प्रसिद्धमविरुद्धं च निश्चितं साधने क्षमम्।
संक्षिप्तं निखिलार्थञ्च देशकालाविरोधि च ।।
वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवत्।
स्थानावसथसाध्याख्याजात्याकारवयोयुतम्।
साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनामवत्।
परात्मपूर्वजानेकराजनामभिरङ्कितम्।
क्षमालिङ्गात्मपीडावत्कथिताहर्तृदायकम्।
यदावेद्यते राज्ञे तद्भाषेत्यभिधीयते।

( मिताक्षराटीकायामुल्लिखितं याज्ञवल्कीयं, २।६ श्लोकमाश्रित्य )

देवणभट्टेन स्मृतिचन्द्रिकायां व्यवहारकाण्डे प्रतिज्ञावादप्रकरणे वचनानि सर्वाणि संग्रहकारस्येति उल्लिख्य प्रतिपदं व्याख्यानं प्रदत्तम्।

प्रतिज्ञास्वरूपज्ञापकानि कात्यायनवचनानि स्मरणीयान्यत्र—

निवेश्य कालं वर्षं च मासं पक्षं तिथिं तथा।
वेलां प्रदेशं विषयं स्थानं जात्याकृतीवयः ।। १२४
साध्यप्रमाणं द्रव्यं च संख्यां नाम तथात्मनः।
राज्ञां च क्रमशो नाम निवासं साध्यनाम च ।। १२५
क्रमात् पितॄणां नामानि पीडां चाहर्तृदायकौ।
क्षमालिङ्गानि चान्यानि पक्षं संकीर्त्य कल्पयेत् ।। १२६
देश श्चैव तथा स्थानं संनिवेश स्तथैव च।
जातिः संज्ञा निवास श्च ( संज्ञाधिवासश्च ) प्रमाणं क्षेत्रनाम च ।। १२७
पितृपैतामहं चैव पूर्वराजानुकीर्तनम्।
स्थावरेषु विवादेषु दशैतानि निवेशयेत् ।। १२८

( मिताक्षरायामुद्धृतमिदं परन्तु न कात्यायनवचनत्वेन। केवलम् **'इति स्मरणात्'** इति निर्देशः। ( याः स्मृतेः २।६ श्लोकमाश्रित्य )। अपरार्के, p. 608 ; स्मृतिचन्द्रिकायाम् ;

व्यः, काण्डे p. 84. तथान्यत्र १२७-१२८ संख्यकोक्तं वचनद्वयं नाम्ना कातायनस्य इत्युल्लिखितम् )।[१]

रागादीनां यदेकेन कोपितः करेण वदेत् ।
तदोमिति लिखेत् सर्वं वादिनः फलकादिषु ।। १२९
अधिकान् शोधयेदर्थान् न्यूनांश्च प्रतिपूरयेत् ।
भूमौ निवेशयेत्तावद्यावत् पक्षः प्रतिष्ठितः ।। १३०
पूर्वपक्षं स्वभावोक्तं प्राड्विवाकोऽभिलेखयेत् ।
पाण्डुलेखेन फलके ततः पत्रे विशोधितम् ।। १३१
अन्यदुक्तं लिखेदन्यद्योर्थिप्रत्यर्थिनां वचः ।
चौरवच्छासयेत्तं तु धार्मिकः पृथिवीपतिः ।। १३२
सोल्लेखनं वा लभते त्र्यहं सप्ताहमेव वा ।
मतिरुत्पद्यते यावद्विवादे वक्तुमिच्छतः ।। १३३
यस्मात् कार्य्यसमारम्भाच्चिरात्तेन विनिश्चयः ।
तस्मान्न लभते कालमभियुक्त स्तु कालभाक् ।। १३४
मति र्नोत्सहते यत्र विवादे कार्यमिच्छतोः ।
दातव्य स्तत्र कालः स्यादर्थिप्रत्यर्थिनोरपि ।। १३५

तत्र यथार्थतया सिद्धान्तरूपत्वेन व्याख्यातं देवणभट्टेन—'एवं च यत्र यदुपयुज्यते तत्र तदभावे साध्यसिद्धेः कर्तुमशक्यत्वादनादेय एवोपयोगविहीनः पक्षः' । तत्रानुकूलत्वेन कात्यायनवचनमुद्धृतम्—

देशकालविहीन श्च द्रव्यसंख्याविवर्जितः ।
क्रियाप्रमाणहीन श्च पक्षो नादेय इष्यते ।। १३८

कात्यायनेन प्रसङ्गतः प्रतिज्ञादोषाः विस्तरशः प्रतिपादिताः यथा—

य श्च राष्ट्रविरुद्ध श्च य श्च राज्ञा विवर्जितः ।
अनेकपदसंकीर्णः पूर्वपक्षो न सिध्यति ।। १३६
बहुप्रतिज्ञं यत् कार्य्यं व्यवहारेषु निश्चितम् ।
कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सया ।। १३७

---

१। हारीत वचनान्यत्रोद्धृतानि स्मृतिचन्द्रिकायां ( पृः ८४ ) यत्र विशेषोऽनुधावनीयः—

आसनं शयनं यानं ताम्रं कांस्यमयोमयम् ।
धान्यमश्ममयं वस्त्रं द्विपदं च चतुष्पदम् ।
मणिमुक्ताप्रवालानि हीरकं रूप्यकाञ्चनम् ।
यदि द्रव्यसमूहस्स्यात् संख्या कार्या तथैव च ॥
यस्मिन् देशे च यद्द्रव्यं येन मानेन मीयते ।
तेन तस्मिन् तथा संख्या कर्तव्या व्यवहारिभिः ॥

न्यायस्थं नेच्छते कर्त्तुमन्यायं वा करोत्ययम् ।
न लेखयति यस्त्वेवं तस्य पक्षो न सिध्यति ॥ १३९
अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम् ।
असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत् ॥ १४०

( मिताक्षरायां याज्ञवल्क्यस्मृतेः २।६ श्लोकमाश्रित्य कात्यायनस्य वचनमिदं नामोल्लेखं विना निर्देशितम् )

प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणाश्रितम् ।
निश्चितं लोकसिद्धं च पक्षं पक्षविदो विदुः ॥ १४१
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः ।
विरोधिकारणैर्मुक्तो विरोधिप्रतिषेधकः ॥ १४२
यदा त्वेवंविधः पक्षः कल्पितः पूर्ववादिना ।
दद्यात्तत्पक्षसंबद्धं प्रतिवादी तदोत्तरम् ॥ १४३
श्राव्यमाणोऽर्थिना यत्र योह्यर्थो न विघातितः ।
दानकालेऽथवा तूष्णीं स्थितः सोऽर्थोनुमोदितः ॥ १४४

बृहस्पतिस्मृतौ पक्षलक्षणं प्रतिपादितं यथा—

उपस्थिते तत स्तस्मिन् वादी पक्षं प्रकल्पयेत् ।
निरवद्यं सप्रतिज्ञं प्रमाणागमसंयुतम् ॥ २.५

पक्षदोषा अपि विश्लिष्य दर्शिता स्तेन—

अप्रसिद्धं सदोषं च निरर्थं निष्प्रयोजनम् ।
असाध्यं वा विरुद्धं वा पक्षं राजा विवर्जयेत् ॥ २.८*

तेषां तेषां विशेषणानां सार्थक्यं विश्लेषणञ्चोल्लिखितं बृहस्पतिना । तत्राप्रसिद्धस्य लक्षणं बार्हस्पत्यं यथा—न केनचित् कृतो यत्तु सोऽप्रसिद्ध उदाहृतः । २.६

(उदाहरणमत्र स्मृतिचन्द्रिकायां—'अत्रोदाहरणं पलसहस्रकृतं स्थानं गृहीतमिति)

अन्यार्थः स्वार्थहीनश्च सदोषः परिकीर्त्तितः । २.९

निरर्थनिष्प्रयोजनौ दर्शितौ बृहस्पतिना—

स्वल्पापराधस्स्वल्पार्थो निरर्थक इति स्मृतः ।
कार्यबाधविहीन स्तु विज्ञेयो निष्प्रयोजनः ॥ २.१०

---

*मिताक्षरायां यदत्रोल्लिखितं तत् स्मर्तव्यम्—'एवं पक्षलक्षणे स्थिते पक्षलक्षणरहितानां पक्षवदवभासमानानां पक्षाभासत्वं सिद्धमेवेति योगीश्वरेण न पृथक् पक्षाभासाः उक्ताः **अन्यैस्तु** विशिष्टार्थमुक्ताः—

अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम् ।
असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत् ॥ इति ।

तेषां तेषां पदानां सोदाहरणं व्याख्यादिकमपि विहितं तत्र मिताक्षरायाम् ( याः, २।६ ) श्लोकमाश्रित्य ।

प्रकारान्तरेणाप्येतौ तेनैव दर्शितौ—

कुसीदाद्यैः पदैर्हीनो व्यवहारो निरर्थकः ।
वाक्पारुष्यादिभि श्चैव विज्ञेयो निष्प्रयोजनः ॥ २.११

( व्याख्यातं देवणभट्टेन—ऋणादानाद्यष्टादशपदानन्तर्भूतो निरर्थकः । वाक्पारुष्यादिभिः साध्यसिद्धयनुपयुक्तैः सहितः पक्षो निष्प्रयोजन इत्यर्थः । स्मृतिचन्द्रिका, पृः ८५ )

असाध्याविरुद्धयो र्लक्षणं सोदाहरणं प्रदर्शितं बृहस्पतिना—

ममानेन प्रदातव्यं शशशृङ्गकृतं धनुः ।
असम्भाव्यमसाध्यं तं पक्षमाहु र्मनीषिणः ॥ २.१२
यस्मिन्नावेदिते पक्षे प्राड्विवाके च राजनि ।
पुरे राष्ट्रे विरोधः स्याद्विरुद्धः सोऽभिधीयते ॥ २.१३

नारदोऽपि भाषादोषान् दर्शयति—

अन्यार्थमर्थहीनं च प्रमाणागमवर्जितम् ।
लेख्यं हीनाधिकं भ्रष्टं भाषादोषा स्तूदाहृताः ॥ २.८

विस्तरश स्तेषां तेषां दोषविशेषाणामालोचनात्मकं विवरणं यथास्थानं प्रदर्शयिष्यते इत्यत्र न लपितमधिकम् ।

तदयमस्य श्लोकस्य पिण्डितार्थः :—व्यवहारे या प्रतिज्ञादौ उपस्थाप्यते प्राड्विवाकसन्निधौ तस्योपयोगित्वं त्वनुधावनीयमेव यतः भाषायामसन्निवेशितस्य प्रमाणादिकं कथमपि नाङ्गीक्रियते । भाषायामुल्लिखितस्य वस्तुनः प्रमाणादिभिः उपस्थापिते जयादिकं निश्चित मन्यथा तु पराजयस्य निश्चितत्वमेव । अतएव शास्त्रकृद्भिः व्यवहारवेलायां भाषा प्रतिज्ञा वा यथा सर्वदोषविनिर्मुक्ता भवेत्तदर्थं विहितः निर्देशः ।

---

**कुलानि श्रेणय श्चैव गणा श्चाधिकृतो नृपः ।**
**प्रतिष्ठा व्यवहाराणां गुर्वेभ्य स्तूत्तरोत्तरम् ॥ ७ ॥**

---

गुर्वेषामुत्तरोत्तरम् ॥ B ; गुर्वेषं तूत्तरोत्तरम् L on ; N.M.S, °श्चाधिकृता, also Vijñ on *Yāj*, II. 30. ; नृपैः ; व्यवहारस्य ; गुर्वेषामुत्तरोत्तरम् ।

In the *Vyavahāra-Mādhava* this has been ascribed to Manu and Kātyayāna. p. 28 ; *Vya-Mātṛka* ascribes this to Manu. Medhātithi explains this verse, but does not refer to the source (Nāradā). *Daṇḍaviveka* ascribes it to Bṛhaspati, p. 16.

---

**Eng. Trans.** - An assembly (consisting of few expert persons—*nītijña* ; of the members of the family, or of kinsman), corporations (comprising of persons of same prefessions like merchants etc), assembly (cf. persons who move about in groups like masons etc), one appointed by the

king (*adhikṛta*—a Brāhmaṇa versed in the *Vedas*) and the king himself, are (to be regarded as) foundations (are invested with the power to decide law suits). Of them each succeeding one is (to be regarded as) superior to the one preceding him in order.

---

**असहायभाष्यम्**—यदा व्यवहारप्रतिष्ठार्थिप्रत्यर्थिनोः परस्परं सुचिरमपि विवदतो र्न निर्णयो भवति तदा कुलादय स्त्रयः पदार्था व्यवहारप्रतिष्ठाहेतवः। उत्तरोत्तरगणे त्वेते समुद्दिष्टाः। तत्र कुलानि कतिचित्पुरुषगृहीतानि। श्रेणयः प्रधानवणिक्प्रतिबद्धाः प्रकृतयः। गणा ब्राह्मणादिसमूहः। अधिकृतो धर्माधिकरणे नियुक्तः प्राड्विवाकः। नृप स्वयमेव प्रजापालः। एतेषु स्थानेषु व्यवहाराणां निष्पत्तिः प्रतिष्ठामुखेनैव भवतीति। 'गुर्वेभ्यस्तूत्तरत्तर'मिति। एभ्यः स्थानेभ्य उत्तरोत्तरं व्यवहारनिष्पत्तिस्थानं गुरु प्रधानमित्यर्थः॥ ७॥

---

**भवस्वामिभाष्यम्**—कुलानि उभाभ्यामानीता नीतिज्ञाः। श्रेणयो वणिगादयः। अधिकृताश्च नृपैः स्थानेषु राजभिः स्वामित्वेन नियुक्ताः। नृपा इति पाठे राजानश्च। प्रतितिष्ठन्त्यस्यां व्यवहारा इति प्रतिष्ठा। प्रतिष्ठाशब्दः प्रत्येकमभिसम्बध्यते। एषामन्यतमेन वर्गेण शास्त्रोक्तेन विधिना स्वसमयेन वा निर्णीतो व्यवहारः सिध्यति। उत्तरोत्तरं पूर्वस्मात् गुरुतरं भवति प्रमाणतरं भवतीत्यर्थः। एवं ब्रुवतैतदुक्तं भवति—अर्वाक् पुन दर्शनप्रसङ्गोऽस्ति, नृपेण तु दृष्टे तत उत्तरस्य गुरुतरस्याभावात् पुनः प्रसङ्गो नास्तीति। अन्ये ब्रुवते—कुलादय एवान्वज्ञाता नृपैः प्रतिष्ठेति। असौ ··· नेन युक्तानामुपसंग्रहः। तदर्थमेव च नियुक्तानां स्वमित्वेन कुलादीनां केवलानामप्रामाण्यं स्यात्। ततश्च नृपग्रहणेन नियुक्ता अपि गृह्यन्ते। नृन् पालयतीति नृप इति परित्यक्तरुढित्वात् क्रियाशब्दः स्यात्। ततश्च 'तै रनुज्ञाता' इति वचनात् तेषां प्रामाण्यं गम्यत इत्युपपद्यते॥ ७॥

---

**नारदस्मृतितत्त्वप्रकाशिका**—अस्मिन् श्लोके व्यवहाराणां प्रतिष्ठा का भवितुमर्हतीति नारदेन प्रतिपाद्यते। प्रतिष्ठा इति पदेन किमभिधीयते तत्तु स्पष्टतः टीकाकृद्भिः न प्रपञ्चितम्। असहायेन व्याख्यातं दर्शितं च प्राक् यत् प्रतिष्ठा नाम व्यवहाराणां निष्पत्तिः, प्रतिष्ठामुखेनैव तद् भवतीति। भवस्वामिना तात्त्विकोऽर्थः आविस्कृतः इति अनुमीयते। तस्मात् व्यवहारसिद्धिः एतेषामन्यतमेषु प्रतिष्ठति। अर्थात् व्यवहारसिद्ध्यर्थं कस्य सविधे गन्तव्यमित्यत्र मुनिना निर्देशः प्रदत्तः।

सौभाग्यमिदमस्माकं यन्मेधातिथिना मनुस्मृतेः अष्टमाध्यायस्य द्वितीयं श्लोकमाश्रित्य नारदवचनमिदमुद्धृतं व्याख्यातञ्च। तदेवात्रोपदर्श्यते। तत्र 'कुलानि' बन्धुजनसमूहः तै र्या व्यवस्था कृता ततो न विचलितव्यम्। अथ तत्र नाश्वस्यु स्तवैतेऽधिकतरं सम्बन्धिन इति वदन्त स्ततः श्रेणिषु निवेदितव्यम्। 'श्रेणयः' समानव्ययवहारजीविनो वणिक्प्रभृतयः। तेषां बन्धुभ्योऽधिकगुरुत्वम्। बान्धवा हि ज्ञातिधर्मभयाद्विचलितं न नियच्छन्ति। श्रेणय स्तु राजगमनेन श्रेणिधर्मो राजपुरुषप्रवेशात् परिभवनीयत्वेन नश्यतीति अविचलनार्थं

प्रतिभूग्रहणपूर्वकं विचारयन्ति य एतस्माद्विचलति । परिषदि दण्डो दातव्यश्चलितुं वाऽपि त्वया न देयमिति । 'गणा' गणशश्चारिणो गृहप्रासादादिकरा मठब्राह्मणादयश्च । ते स्वगणिनां व्यवहारं पश्येयुः । तत्राविचलार्थं उपसदः कर्त्तव्याः । पूर्वं समानकर्मजीविन एकाकिनोऽपि इमे तु संभूयकारिण इति विरोधः । श्रेणिभ्यः सम्भूयकारितया विवादिनो भूमिज्ञत्वात् । अन्ये तु 'कुलानी'ति मध्यस्थानाहुः । ते हि कार्य्याभ्यन्तरा अश्रेणिकृता एव निर्णेतारः । 'अधिकृतः' त्रैविद्यो विद्वान् ब्राह्मणः । तस्य हि धर्मसंकटेषु प्रवक्तृत्वं विहितम् । तस्य पूर्वेभ्यो गुरुत्वं वैदुष्यात् । नृपस्यापि गुरुत्वमतिशयशक्तित्वादतः स्वयं विदुषा नृपेण निर्णीते नास्त्येतत्—

'यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः ।
द्विगुणं दण्डमास्थाय तत्कार्य्यं पुनरुद्धरेत् ।।' इति

अन्येषु करणेष्वेतद्भवति । तत्र ह्यस्ति वचनावसरो नाधिकृतैः सम्यक् निर्णीतं राज्ञा तु विवेचिते किं वक्ष्यतीति ।

अर्थान्तरम्—नृपैरधिकृतो राजस्थानीयब्राह्मणः । तथान्यस्य गृहिणः स्वतन्त्रस्तु गृहे गृहीति स्वातन्त्र्यस्मरणाद्दण्डपर्य्यन्तोऽस्त्येव व्यवहारः सुपरिक्षीतो भवति वासनाविनयार्थं श्रुतिग्राह्यप्रसक्तशिष्यसुताद्याः 'अन्यत्र दण्डाच्छरीरात् पतनीयाच्च कर्मण' इति । स्वल्पेऽप्यपराधे गृहस्थ एव राजायते । महति व्यतिक्रमे राजनिवेदनमेवोचितमित्यस्यार्थः ।

स्मर्त्तव्यमत्र याज्ञवल्क्यीयं वचनं व्यवस्थासिद्धये व्यवहारदर्शिनां बलाबलमधिकृत्य—

नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च ।
पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम् ।। २.३०

तत्र विज्ञानेश्वरेणात्र मिताक्षरायां व्याख्या या विहिता सा तु नारदवचनस्थितपदानां विश्लेषणे सहायभूता । तत्रैवं 'श्रेणय' इत्यस्य व्याख्यानं विज्ञानयोगिकृतं यथा–'श्रेणयो नानाजातीनामेकजातीनामप्येककर्मोपजीविनां संघाताः यथा हेड़ावुकादीनां ताम्बुलिक-कुविन्द-चर्मकारादीनां च । 'कुलानि' ज्ञातिसम्बन्धिबन्धूनां समूहाः ।

विज्ञानेश्वरेणात्र व्याख्याद्वारेण प्रपञ्चितं यत् नृपाधिकृतै निर्णीते व्यवहारे पराजितस्य यद्यप्यसन्तोषः कुदृष्टिबुद्ध्या भवति । तथापि न पूगादिषु पुनर्व्यवहारो भवति । एवं पूगनिर्णीतेऽपि न श्रेण्यादिगमनम् । तथा श्रेणिनिर्णीते कुलगमनं न भवति, कुलनिर्णीते तु श्रेण्यादिगमनं भवति, श्रेणिनिर्णीते पूगादिगमनम्, पूगनिर्णीते नृपाधिकृतगमनं भवति । तस्मिन्नेव प्रसङ्गे नारदवचनमुद्धृतं विज्ञानेश्वरेण ।

व्यवहारमाधवे मन्ये भ्रान्तिवशादेव वचनमिदं कात्यायनीयवचनत्वेन प्रदर्शितम् । (तत्र P. V. Kane-कृतः कात्यायनस्मृतिसारोद्धार-सञ्ज्ञकः ग्रन्थः ८२-संख्यकः श्लोकः आलोचनीयः) ।

दण्डविवेके वर्धमानकृते (Gaekwad's Oriental Series, Baroda, 1931, p. 16) वचनमिदं बृहस्पतिवचनत्वेन मन्ये भ्रान्त्या उदाहृतम् । (द्रष्टव्यं बृहस्पतिस्मृतौ १.७५ संख्यकः श्लोकः ।

अधिकं यदुक्तं बृहस्पतिना तदत्रोल्लेखमर्हति, यथा—

कुलश्रेणिगणाध्यक्षाः प्रोक्ता निर्णयकारकाः ।
विचार्य्य श्रेणिभिः कार्य्यं कुलै र्यन्न विचारितम् ।। १.६३
गणैश्च श्रेण्यविज्ञातं गणाज्ञातं नियुक्तकैः ।
कुलादिभ्योऽधिकास्सभ्या स्तेभ्योऽध्यक्षस्स्मृतोऽधिकः ।। १.६४

कात्यायनवचनानि नैगमव्रातादिसंज्ञानिर्देशकानि प्राकरणिकतयापस्थाप्यते अत्र। तदुक्तं संज्ञानिर्देशावसरे—

नानापौरसमूहस्तु नैगमः परिकीर्त्तितः ।
नानायुधधरा व्राताः समवेताः प्रकीर्त्तिताः । ६७८
समूहो वणिजादीनां पूगः संपरिकीर्त्तितः ।
प्रव्रज्यावसिता ये तु पाषण्डाः परिकीर्त्तिताः ।। ६८६
ब्राह्मणानां समूहस्तु गणः सम्परिकीर्तितः ।
शिलोपजीविनो ये तु शिल्पिनः परिकीर्त्तिताः ।। ६८०
आर्हतसौगतानां तु समूहः सङ्घ उच्यते ।
चण्डालश्वपचादीनां समूहो गुलमुच्यते ।। ६८१
गणपाषण्डपूगाश्च व्राताश्च श्रेणय स्तथा ।
समूहस्था श्च ये चान्ये वर्गाख्या स्ते बृहस्पति ।। ६८२

तत्र 'श्रेणि' इति पदमृग्वेदे ( १.१६३.१०—हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्यमश्वाः ), तथा 'व्रात', 'गण' इत्यादय अपि बहुशः उपलभ्यन्ते ( ऋ, ३.२६.६ ; ५.५३.११ ) । कौषीतकि-ब्राह्मणे ( १६.७ ) रुद्रस्य 'पूग' इति संज्ञा ( पूगो वै रुद्रः, तदेनं स्वेन पूगेन समर्धयति ) । पाणिनीयं सूत्रमुल्लेख्यम्—व्रातेन जीवति ५.२.२१, (व्रातीन) ; वन्धपूगगणसङ्घस्य तिथुक्—पाः, ५.२.५२ । पातञ्जलं व्याख्यानमत्रोहनीयं—नानाजातीया अनियतवृत्तयः उत्सेधजीविनः सङ्घा व्राताः, तेषां कर्म व्रातं, तेन व्रातकर्मणा जीवतीति व्रातीनः । (पाः, ५.२.२१ सूत्रमुपजीव्य) । द्रष्टव्या च काशिका (५.२.२१)—नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगाः, इति ।

द्रष्टव्यमर्थशास्त्रम् यत्राभिहितम्—आयुधीयप्रायः श्रेणीप्रायो वा मे जनपदः । ( ७.१.३३ ) ; अन्यत्राप्युक्तम्-काम्बोजसुराष्ट्रक्षत्रियश्रेण्यादयो वार्त्ताशस्त्रोपजीविनः। (११.१.४) ; अपरं च प्रत्यभिलेख्यविरोधे ग्रामनगरवृद्धश्रेणीप्रत्ययः । वशिष्ट-धर्मसूत्रम् १६.१५ ।

नारदेन समयस्यानपाकर्माभिधेये व्यवहारपदे यदभिहितं तदपि स्मरणीयम् यथा—

पाषण्डिनैगमश्रेणीपूगव्रातगणादिषु ।
संरक्षेत् समयं राजा दुर्गे जनपदे तथा ।। २
यो धर्मः कर्म यच्चैषामुपस्थानविधि श्च यः ।
यच्चैषां वृत्त्युपादानमनुमन्येत तत्तथा ।। ३

नानुकूलं च यद्राजा प्रकृत्यवमतं च यत् ।
बाधकं च यदर्थानां तत्तेभ्यो विनिवर्तयेत् ।। ४
मिथः सङ्घातकरणमहितं शस्त्रधारणम् ।
परस्परोपघातं च तेषां राजा न मर्षयेत् ।। ५
पृथग्गणांश्च ये भिन्द्युस्ते विनेया विशेषतः ।।
आवहेयु र्भयं घोरं व्याधिवत्ते ह्युपेक्षिताः ।। ६

शिलालिप्यामपि तेषां कथञ्चिन्निर्देशो वर्त्तते इति कृत्वा संकेतमात्रेणैव तेषां उल्लेखः । *Nasik Inscription* No. 15. of the time of Ābhīra Iśvasena, *E. I.* Vol. VIII. p. 88 ; यत्र कुम्भकारादीनां श्रेणीनां निर्देशः ; *Junnar Buddhist Cave Inscription* (*Archaeological survey of Western India*, Vol. IV. p. 97) ; *Gupta Inscription*, No. 18. p. 79 ; *E. I.* vol. 15. p. 263 : *E.I.* Vol. 18, p. 326 ; p. 30 ; *E.I.* Vol. 16 ; p. 332 ; *E. I.* Vol. I. 155 etc.

विशेषतः आलोचनीयः ग्रन्थः खलु—

R. C. Majumdar, *Corporate Life in Ancient India.*

**स चतुष्पाच्चतुःस्थान श्चतुःसाधन एव च ।**
**चतुर्हित श्चतुर्व्यापी चतुष्कारी[1] च कीर्त्यते ।। ८**
**अष्टाङ्गोऽष्टादशपदः शतशाख स्तथैव च ।**
**त्रियोनि र्द्व्यभियोगश्च द्विद्वारो द्विगति स्तथा ।। ९**

---

N.M.S. चतुकारीति ;

---

**Eng Trans.**—That (judicial procedure) consists of four feet (steps), four bases, four means ; is beneficial to four (stages of life), is concerned with four (categories of persons) and is contributing to four (varieties of results). 8.

It has eight constituents (members) and is comprised of eighteen topics, hundred branches (sections). It arises out of three (efficient causes), and has two varieties of plaint, two openings and two issues or courses.

---

**असहायभाष्यम्**—अत्रानेन श्लोकद्वयेनापि व्यवहारस्य संख्यापूर्वकः संज्ञासूत्रोपन्यास एव कृतः । सविस्तरार्थप्रतिपत्तिविवरणं वक्ष्यमाणमुपरितनश्लोकैः शास्त्रकार एव करिष्यति । ८-९ ।।

---

**भवस्वामिभाष्यम्**—एतौ संक्षेपश्लोकौ । एतेऽर्थाः क्रमेण प्रत्येकं विशेष्यन्ते ८-९ ।।

**नारदस्मृतितत्त्वप्रकाशिका**—ग्रन्थकृता स्वेनैव विभिन्नदृष्ट्या व्यवहारस्य स्वरूपगतं विवरणं प्रदर्शितमुत्तरश्लोकेषु प्रतिपदव्याख्यापुरःसरम् । चतुष्पात्त्वादिकं यदभिहितमत्र तत्तु न स्वरूपत्वेन ग्राह्यमपि तु परिचायकत्वेनेत्यत्र तत्त्वम् ।

बृहस्पतिना धनहिंसासमुद्भूतत्वेन व्यवहारस्य द्विपात्त्वं प्रदर्शितमित्यत्रानुसन्धेयम्—

द्विपदो व्यवहारः स्यात् धनहिंसासमुद्भवः ।
द्विसप्तकोऽर्थमूलस्तु हिंसामूल श्चतुर्विधः । १.६

---

**धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ।**
**चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वबाधकः ।। १०**
**तत्र सत्ये स्थितो धर्मो व्यवहार स्तु साक्षिषु ।**
**चरित्रं पुस्तकरणे राजाज्ञायां तु शासनम् ।। ११**

---

Verse 11 : प्रश्नकरणे, L b c ; तु स्वीकरणे Mādhavīya; Vīramitrodaya. चरित्रं संग्रहः पुंसाम् as recorded in the Bhavasvāmi's commentary on N.M.S, 11.

---

**Eng. Trans**—*Dharma*, judicial proceedings, *Caritra* and an edict from the king—these are the four feet (constituents) of a lawsuit. (In the list) each following one is superior to the other mentioned previously. 10.

Amongst them the *Dharma* variety of *Vyavahāra* is based on truth ; judicial procedure rests on the witnesses, *Caritra* type of *Vyavahāra* rests on facts or customary laws reduced to writing ; and *Rājaśāsana* (edict) depends on the directive of the king. 11.

---

**असहायभाष्यम्**—एवं चतुष्पादोऽयमभिहितो व्यवहारः यस्य चैवं निर्दिष्टचतुष्पादस्य चतुर्णामपि पादानां विवरणश्लोकोऽयमनुगत एव भवति ।। १० ।।

तत्र सत्ये स्थितो धर्म इति । यदा धनिकर्णिकयोरेकान्तव्यवहारेऽपि परस्परं सत्याच्चलनं नास्ति तदासौ सत्यव्यवहार उच्यते । तस्मिन् सत्यसंव्यवहारे साक्षाद्धर्म एव स्थितः । स च व्यवहारचरित्रराजशासनानामदत्तावकाशस्वरूपत्वेन स्वतो वर्तमानधर्म एवोच्यते । 'व्यवहार स्तु साक्षिष्वि'ति यदुक्तं तत्र धनिकर्णिकयोरेकतरदोषादपि सत्यधर्मचलनशङ्कोत्पत्तौ संजातायां साक्षिप्रत्ययो यः संव्यवहारं प्रवर्त्तते स व्यवहार इत्युच्यते । स चोत्तरपूर्वस्य बाधयोत्पन्न स्तेन पूर्वबाधक इति । य'च्चरित्रं पुस्तकरण' इत्युक्तं तच्चरित्रमिति पत्रकभूर्जचीरकसंपुटिकादिषु साक्षिहस्तसुनिबद्धं कृत्वा यो व्यवहारः प्रवर्त्तते स चरित्र मित्युच्यते । स च पूर्ववाक्यादुत्तरः पूर्वबाधक इति । यस्तु राज्ञा समावेदितो व्यवहारः स राजशासनायत्तः, सर्वेषामप्येतेषामधिकः सर्वोत्तरश्च । यत इत्युक्तम्—

ग्रामे दृष्टः पुरे याति पुरे दृष्ट स्तु राजनि ।
राज्ञा दृष्टः कुदृष्टो वा नास्ति पौनर्भवो विधिः ।।

तदेवायं चतुर्विभागरूपत्वात् चतुष्पादो व्यवहारः । तदा तदत्र लोकसंव्यवहारः इत्युच्यते । स च द्विविधः, प्रयोजनापेक्षया प्रवर्तितोऽपि देशकालवशात् ।। ११ ।।

---

**भवस्वामिभाष्यम्**—तत्र तेषु चतुर्षु सत्ये स्थितो धर्मः । तथाभूताख्याने उभयोरपि प्रतिपत्तौ साक्ष्यादिभिः प्रयोजनाभावात् धर्मसंव्यवहारः । यथा कश्चित् ब्रूयात् 'ममासौ धारयति दाप्यतामिति । स्वामिनाहूय पृष्टः, स चाह—'सत्यं धारयामि ददानि चेति' समाप्तो धर्मव्यवहारः । 'व्यवहार स्तु साक्षिष्विति'—विसंवादे साक्षिभिः निर्णीयते, स साक्षिव्यवहारः । 'चरित्रं पुस्तकरण' इति । लेख्येन निर्णीयते, तच्चरित्रम् । 'चरित्रं सङ्ग्रहः पुंसा'मिति पाठान्तरम् । पारम्पर्य्याविच्छिन्नस्मृतिदेशाधिष्ठानगणधर्मः सत्पुरुषैः परिगृहीतः, तस्मिन् स्थित इति सम्बन्धः । स तथैव द्रष्टव्यः । 'राजाज्ञायां तु शासनम्' इति । राज्ञामाज्ञा, तत्र स्थितं शासनम् । राज्ञ इच्छा यथा तथाज्ञासिद्धिः । अत्रोत्तरोत्तरं पूर्वस्य पूर्वस्य बाधकं, पूर्वेण पूर्वेणासिद्धावुत्तरोत्तरेण सिध्यतीति ।

---

**नारदस्मृतितत्त्वप्रकाशिका**—व्यवहारस्य चतुष्पात्त्वविषयमधिकृत्य सुस्पष्टमवधारणं शास्त्रकृतां नासीदित्यादावेवानुधावनीयम् । प्रथमतः याज्ञवल्क्यीयं वचनमुल्लेख्यं तदनन्तरमन्येषां वचनानां तत्र सङ्गतिरसङ्गति र्वेति विचारणीया । तथाहि व्यवहाराध्याये तेन अष्टमे श्लोके प्रदर्शितम्—

चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शित इति । (२.८)

विश्वरूपेण बालक्रीड़ाभिधेयायां टीकायां प्रपञ्चितं यत् प्रतिज्ञा, उत्तरं, साधनं निर्णयश्चेत्येवं चतुष्पात् । (द्रष्टव्यं श्रीयाज्ञवल्क्यस्मृतिः, महामहोपाध्याय गणपतिशास्त्रिणा संशोधिता । Second Edition 1982, Munshiram Manoharlal Publishers, Delhi, First Edition, Trivandrum 1922.)

विज्ञानेश्वरेण मिताक्षरायां पादशब्दस्य अंशार्थकत्वं स्पष्टमेवोल्लिखितं यथा—…'इत्युक्तो सोऽयमित्थं चतुष्पाच्चतुरंशकल्पनया व्यवहारः विवादेषूपदर्शितो वर्णितः ।

तत्र प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना ।
समामासतदर्धाहर्नामजात्यादिचिह्नितम् ।।

(याः, स्मृतिः, २।६) इति प्रथमः पादः खलु भाषापादाभिधेयः ।

'श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ' (याः स्मृः, २.७)

इत्युत्तरपादः खलु द्वितीयः ।

'ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्' (२।७)

इति क्रियापाद स्तृतीयः ।

'तत्सिद्धौ सिद्धिमाप्नोति, विपरीतमतोऽन्यथा'' इति

साध्यसिद्धिपाद श्चतुर्थः ।

अत्र विज्ञानेश्वरपादेनानुकूलतया मतं कस्यचिदाचार्य्यस्य उल्लिखितं यथा—

परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु ।
वाक्यन्यायाद्व्यवस्थानं व्यवहार उदाहृतः ।।

भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः ।
आक्षिप्तचतुरंश स्तु चतुष्पादभिधीयते ।। इति

अधिकं प्रपञ्चितं तेन यत् सर्वदा चतुष्पात्त्वं नाभिप्रेतं व्यवहारस्य । तथा ह्युक्त-मेतत् टीकाकृता—'संप्रतिपत्त्युत्तरे तु साधनानिर्देशात् भाषार्थस्यासाध्यत्वाच्च न साध्यसिद्धि-लक्षणः पादोऽस्तीति द्विपात्त्वमेव ।

प्रत्याकलितस्य व्यवहारपादत्वमधिकृत्य व्याख्या काचित् प्रदर्शिता तत्रैव यथा—उत्तराभिधानानन्तरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रिया स्यादिति परामर्शलक्षणस्य प्रत्या-कलितस्य योगीश्वरेण व्यवहारपादत्वेनानभिधानात् व्यवहर्तृसम्बन्धाभावाच्च न व्यवहार-पादत्वमिति स्थितम् ।

बार्हस्पत्यं वचनमत्र द्रष्टव्यं यत्र भाषोत्तरक्रियाप्रत्याकलितभेदात् चतुर्विधत्वं निर्देशितम् यथा—

भाषापादोत्तरपादौ क्रियापाद स्तथैव च ।
प्रत्याकलितपाद श्च व्यवहारः चतुष्पादः ।। (२.१)

कात्यायनोऽपि अनुरूपं प्रतिपादयति यथा—

पूर्वपक्षश्चोत्तरं च प्रत्याकलितमेव च ।
क्रियापाद श्च तेनायं चतुष्पात् समुदाहृतः ।। (३१)

बृहस्पतिः उत्तरस्य चतुर्विधत्वमादौ—

मिथ्या सम्प्रतिपत्ति श्च प्रत्यवस्कन्दनं तथा ।
प्राङ्न्याय श्चोत्तराः प्रोक्ता श्चत्वारः शास्त्रवेदिभिः ।। (२.२)

इत्यनेन प्रदर्शयति, तद्भेदवशाच्च वैषम्यं प्रतिपादयति यथा—

मिथ्यायां तु चतुष्पादः प्रत्यवस्कन्दने तथा ।
प्राङ्न्याये च स विज्ञेयो द्विपात् संप्रतिपत्तिषु ।। (२.३)

इदमत्रावधेयं यद्बृहस्पतिना निर्णयप्रसङ्गे चतुर्विधत्वं यदुक्तं तत्तु नारदवचनानुरूप-मिति कृत्वा सन्देहावसरः स्वरूपविषये भवितुमर्हत्येव—एते चत्वारः व्यवहारस्य भेदाः, निर्णयस्य वेति । आह च बृहस्पतिः—

धर्मेण व्यवहारेण चारित्रेण नृपाज्ञया ।
चतुष्प्रकारोऽभिहितः सन्दिग्धेऽर्थे विनिर्णयः ।। ६.१

मित्रमिश्रेण व्यवहारप्रकाशे किञ्चिदत्र सङ्केतरूपेण प्रदर्शितं, तत्तु यथायथं सङ्गतमिति उल्लिख्यते । उक्तं हि तत्र—

यद्यपि प्रतिज्ञादीनां वक्ष्यमाणानां साक्षाद्व्यवहारस्वरूपघटकत्वाद्व्यवहारपादत्वं युक्तं ; धर्मादीनां तु 'तत्र सत्ये स्थितो धर्म' इति नारदोक्तप्रकारेणैव निर्णयमात्रहेतुत्वान्न साक्षाद्व्यवहारपादत्वमर्हम् । याज्ञवल्क्यादिभिरत एव तेषामेव व्यवहारपादत्वमुक्तम् । तद्वचनानि त्वग्रे प्रदर्शयिष्यन्ते । तथापि निर्णयाख्यचतुर्थव्यवहारपादहेतुत्वेन गौणमेव व्यवहारपादत्वमेषामत्रोक्तम् । व्यवहारपदेन निर्णय एव वा लक्ष्यते । तद्धेतुत्वं तत्पादत्व-मिति द्रष्टव्यम् । (पृः ६)

नारदभाषितं यत् 'धर्मश्च व्यवहारश्च…पूर्ववाधकः' इति—प्रायेणानुरूपभाषया अर्थशास्त्रे कौटिल्येन प्रदर्शितं तद्यथा—

धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ।
विवादार्थश्चतुष्पादः पश्चिमः पूर्ववाधकः ।। (अर्थशास्त्रे, ३.१.३९)

(द्रष्टव्यमत्र विशेषतः—R. P. Kangle महोदयेन मन्तव्यं यद्दत्तमाङ्गलभाषायामनुवादप्रसङ्गतः —*Kauṭilīya Arthaśāstra*, II, Bombay, 1972, पृ: १९५)

कात्यायनेन पुनः—'धर्म-' पदस्य निर्णयार्थत्वं यथा वृहस्पतिस्मृतौ तथा—स्वीकृतमिति अनुधावनीयम् । नारदोक्तश्लोके—'तत्र सत्ये स्थितो धर्मः' इत्यस्य व्याख्याने न असहायेन न वा भवस्वामिना वार्हस्पत्यवचनस्य, कात्यायनवचनस्य च उल्लेखः कृत इति आश्चर्य्यावहमिदम् । व्याख्यानं किञ्चिदत्र प्रदर्शयितुं सप्रश्रयं शक्यते यदिदानीं कात्यायनस्मृतिसारोद्धारे P. V. Kane महोदयेन (Bombay, 1933) यानि कात्यायनवचनानि संगृहीतानि टीकानिबद्धग्रन्थेभ्यः तानि मनुवचनानि न वेति संशयावकाशो वर्त्तते एव युक्ततया । अनुरूपयुक्त्या K.V. Ranga Swami Aiyangar—महोदयेन संकलनद्वारेण या बृहस्पतिस्मृतिः (G.O.S. LXXXV, Baroda, 1947) प्रकाशिता सम्पादिता च तत्रापि मूलबृहस्पतिस्मृतेः वाक्यानि तानि नवेति विद्यते एव संशयः । वर्त्तन्ते वचनानि यानि निबन्धकृद्भिः क्वचित् कात्यायनविरचितानि क्वचिद्वा वार्हस्पत्यानि इति उल्लिखितानि तत्रास्य संशयस्य दृढत्वं प्रतिपादितं भवेत् । यद्वा तद्वा भवतु असहायेन भवस्वामिना च कात्यायनवचनस्य बृहस्पतिवचनस्य च उल्लेखः न कृतः ।

वृहस्पतिः स्पष्टतः प्रतिपादयति यद्धर्मादीनां सर्वेषां द्विविधत्वं बोध्यम् । तदुक्तं तेन—

एकैको द्विविधः प्रोक्तः क्रियाभेदान्मनीषिभिः ।
अपराधानुरूपं तु दण्डं च परिकल्पयेत् ।। (९.२)

बार्हस्पत्यं धर्मनिर्णयात्मकं वचनं द्विविधमिति तदत्र प्रदर्श्यते । तत्र प्रथमविधे धर्मनिर्णये सम्यग्विचारपूर्वकं युक्त्युपन्यासद्वारेण तत्त्वानुसरणं भवेत् प्रयोजनानुरोधात् शपथस्यापि प्रयोगो भवेत् । तदुक्तं तेन—

सम्यग्विचार्य्य कार्य्यं तु युक्त्या सम्परिकल्पितम् ।
परीक्षितं तु शपथैः स ज्ञेयो धर्मनिर्णयः ।। (९.३)

द्वितीयविधस्य धर्मनिर्णयस्य स्वरूपमाह बृहस्पतिः यथा—

प्रतिवादी प्रपद्येत यत्र धर्मः स निर्णयः ।
दिव्यैर्वा शोधितस्सम्यक् द्वितीयः स उदाहृतः ।। (९.४)

(अत्र स्मृतिचन्द्रिकायामुक्तस्य पाठस्य ग्रहणं कृतम्)। वादिना अभियुक्तस्यार्थस्य यत्र प्रतिवादिना तथैवाङ्गीक्रियते तदा साक्ष्यादीनामभावेनैव अङ्गीकारात्मकस्य सत्यस्य प्राधान्यात् धर्मनिर्णयः सम्भवति । सति सम्भवे दिव्यात्मकस्य शोधितत्वमत्रावश्यकम् ।

समासेन देवणभट्टेन स्मृतिचन्द्रिकायां f विधस्यास्य स्वरूपं प्रतिपादितं यत् सह तत्त्वानुसरणेन कृतः, प्रथमो धर्माख्यनिर्णयः । विना तत्त्वानुसरणं सत्योत्तरेण वा दिव्यप्रमाणेन वा कृते द्वितीय इत्यर्थः । (पृ: २२) ।

स्मृतिचन्द्रिकायां (पृः २१), तामनुसृत्य वीरमित्रोदयव्यवहारप्रकाशे (पृः ७), तथा पराशर-माधवे कात्यायनीयं वचनमत्र धर्मलक्षणस्वरूपकमुद्धृतं यथा—

दोषकारी तु कर्त्तृत्वं धनस्वामी स्वकं धनम् ।
विवादे प्राप्नुयाद्यत्र धर्मेणैव स निर्णयः ।। (काः, ३५)

ऋणादानादिकं व्यवहारपदं मनसि निधायैव कात्यायनेन धर्मात्मकनिर्णयस्य लक्षणं विहित मत्रेति चारुतया विश्लेषितं तन्मित्रमिश्रेण यथा—

वाक्पारुष्यस्तेयादिदोषकारी व्यवहारप्रवर्त्तनमन्तरेणैवानुतापादिना धर्माभिमुखोऽधर्माद्भीत श्च स्वस्य दोपकर्त्तृत्वं स्वयमभ्युपैति । यत्र धनस्वामी धर्माभिमुखादधर्मभीरोश्चाधमर्णादे र्व्यवहारं विनैव स्वकीयं धनमाप्नोति, तत्रोभयत्र स्वप्रतिपत्त्युत्तर इति यावत् । धर्मेणैव निर्णय इत्यर्थः । अत एवोक्तम्—'तत्र सत्ये स्थितो धर्म' इति । (पृः ७)।

'व्यवहार स्तु साक्षिपु' (स्थितः) इति यदुक्तं नारदेन तत्र व्यवहाराख्यनिर्णयस्य स्वरूपं भङ्ग्या प्रदर्शितं यत् साक्षिपदमत्र सर्वप्रमाणानामुपलक्षकत्वेनादाय यत्र निर्णयः धर्मशास्त्रोक्तप्रमाणानामन्यतमेन क्रियते तत्र व्यवहारस्य विषयः भवत्येव । तदेव स्पष्टीकरेति बृहस्पतिः प्रथमविधव्यवहारस्वरूपकथनद्वारेण यथा—

प्रमाणनिश्चितो य स्तु व्यवहारः स उच्यते । इति (६।५)

प्रमाणशब्देनात्र याज्ञवल्क्योक्तमानुषप्रमाणानां ग्रहणं न्याय्यमिति स्मृतिचन्द्रिकायां देवणभट्टः प्रतिपादयति युक्त्या । तदुक्तं तेन—प्रमाणमत्र मानुषं विवक्षितम्, दिव्यनिश्चितस्य धर्मनिर्णयकोटित्वात् । (पृः २३)।

सारस्तु वार्हस्पत्यवचनस्य प्रदर्शितः स्मृतिचन्द्रिकायाम्—
धर्मशास्त्रनिरूपितप्रतिज्ञोत्तराद्यनुसारेण निर्णयो व्यवहाराख्य इत्यर्थः । (पृः २२)

कात्यायनः व्यवहाराख्यनिर्णयं विश्लिष्य प्रदर्शयति यथा—

स्मृतिशास्त्रं तु यत्किञ्चित् प्रथितं धर्मसाधकैः ।
कार्य्याणां निर्णयार्थे तु व्यवहारः स्मृतो हि सः ।। (का, ३६)।

स्मृतिचन्द्रिकायां देवणभट्टेन समासतः तस्याभिप्रायः परिदर्शितः यथा—
धर्मशास्त्रनिरूपितप्रतिज्ञोत्तराद्यनुसारेण निर्णयः व्यवहाराख्यः इत्यर्थः । (पृः २२)

मित्रमिश्रकृतं व्याख्यानमस्य श्लोकस्यानुधावनीयम् यथा—धर्मसाधकैः सभ्यैः स्मृतिशास्त्रं साक्ष्यादि-प्रत्यायकमर्थिप्रत्यर्थिनोः कार्य्यनिर्णयार्थं प्रथितं प्रख्यापितं यत्र चतुष्पाद्व्यवहारप्रवर्त्तनेन निर्णयकरणमिति यावत् । तत्र व्यवहारो निर्णयहेतुरित्यर्थः । एत एवोक्तं—'व्यवहारस्तु साक्षिषु' इति । (पृः ७)

पूर्वमावेदितं यत् प्रत्येकशः निर्णयानां द्विविधत्वं प्रदर्शितं बृहस्पतिना । अत्र द्वितीयं व्यवहारनिर्णयस्य लक्षणं बृहस्पत्युक्तं यथा—

वाक्च्छलानुत्तरत्वेन द्वितीयः परिकीर्त्तितः । (६.५)

अभिप्राय स्त्वयं यत् यत्र प्रतिवादी छलादिकमाश्रयति, धर्मनिर्णयविपरीतमनुत्तरञ्चावलम्बते तत्र व्यवहारमार्गेण निर्णयो विधेयः ।

'चरित्रं पुस्तकरणे'—इति यच्चरित्राख्यस्य निर्णयस्य स्वरूपमुक्तं नारदेन तत्रादावेव बार्हस्पत्यं वचनं विवेचनीयम् । यथान्यत्र तथात्रापि द्विविधं चरित्रमुल्लिखितं तेन । श्लोकस्य आद्यभागे प्रथमविधस्य चरित्रस्य स्वरूपं निगदितं यथा—

अनुमानेन निर्णीतं चरित्रमिति कथ्यते । इति (९.६)।

अयमर्थः वचनस्य–यत्र प्रत्यक्षतः व्यवहारे साक्षिप्रमाणादीनां नोपलब्धि स्तत्र अनुमानादिना (circumstantial evidence) केवलं चेन्निर्णयः विधीयते तदा तथाविधस्य चरित्रस्य विषयः ।

यत्र पुनः देशाचारतः व्यवस्थावलम्ब्यते तत्र द्वितीयविधस्य चारित्रस्य अवकाशः प्रत्येतव्यः । तदुक्तं बृहस्पतिस्मृतौ—

देशस्थित्या द्वितीयस्तु शास्त्रविद्भिरुदाहृतः (बृहस्पतिस्मृतौ—'तृतीयस्तु' इति यः पाठः गृहीतः स एव नात्र (९.६) परिगृहीतः) ।

कात्यायनकृतं चरित्रलक्षणं तु बृहस्पत्युल्लिखितेन द्वितीयविधचरित्रलक्षणेन सममिति बोध्यं यथा—

यद्यदाचर्य्यते येन धर्म्यं वाधर्म्यमेव वा ।
देशस्याचरणान्नित्यं चरित्रं तत् प्रकीर्त्तितम् (३७)

इदमत्र तत्त्वम्—केचिदाचाराः शास्त्रानुगत्वेन धर्म्याः भवितुमर्हन्ति । अपरे पुनः शास्त्रदृष्ट्या विचारे अधर्मपदवाच्याः भवितुमर्हन्ति । परन्तु अस्मरणीयात् कालात् प्रभृति ये ये आचाराः प्रवर्त्तिताः तेषामनुशीलनेन अधर्मपापाशङ्का न विद्यते । अतएव संशये समुपस्थिते निर्णये देशाचारस्य आश्रयात् चरित्राख्यः निर्णयः सम्भवेत् । विषयेऽस्मिन् मनु-याज्ञवल्क्यादीनां स्मृतिकर्त्तृणां सम्मति वर्त्तते । सदाचारः भगवता मनुना धर्मलक्षणत्वेनाकलितः—

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ।। (२.५) इत्यनेन ।

अनुसन्धेयं वचनान्तरं यथा—

आचारः परमो धर्म श्रुत्युक्तः स्मार्त्त एव च ।
तस्मादस्मिन् यदा युक्तो नित्यं स्यादात्मवान् द्विजः ।। (१.१०८)

स्मर्त्तव्यं अन्यद्वचनादिकं मानवे धर्मशास्त्र (८.४१ ; ८.३) ।

याज्ञवल्क्यः प्रतिपादयति यत् आचारः देशजातः सर्वथा रक्षणीयः राज्ञा । तदुक्तं तेन—

यस्मिन् देशे य आचारो व्यवहारः कुलस्थितिः ।
तथैव परिपाल्योऽसौ यदा वशमुपागतः ।। (१.३४३)

तेषां सर्वेषां पारम्पर्य्यागतानामाचाराणां प्रामाणिकत्वमङ्गीकृतं धर्मसूत्रकृता गौतमेन यथा—देशजातिकुलधर्मा श्चाम्नायैरविरुद्धाः प्रमाणमिति । कर्षकवणिकपशुपालककुसीदिकारवः स्वे स्वे वर्गे । तेभ्य श्च यथाधिकारमर्थान् प्रत्यवहृत्य धर्मव्यवस्था । (११.२०-२२)
अनुधावनीयं वासिष्ठं वचनं यथा—देशजातिकुलधर्माश्च श्रुत्यभावादब्रवीन्मनुः (१.१७) ।

बृहस्पतिः स्पष्टमेवोद्घोषयति यत् प्रवर्त्तितानामाचारात्मकानां धर्माणामपालने अन्यथा-करणे च राज्ञां बलहानिः । तदुक्तं—

प्रतिलोमप्रसूतानां तथा दुर्गनिवासिनाम् ।
देशजातिकुलादीनां ये धर्मा स्तत्प्रवर्त्तिताः ।।
तथैव ते पालनीयाः प्रजा प्रक्षुभ्यतेऽन्यथा ।
जनापरक्ति र्भवति बलं कोशश्च नश्यति ।। (१.१२६-७)

प्रसङ्गतः तेषां तेषामाचाराणां निर्देशः विहितः प्रतिपादितश्च यत् यद्यपि क्वचित् ते सर्वथा सर्वत्र धर्म्यत्वेन तत्त्वतः आकलयितुं न शक्या स्तथापि तेषां पालने न धर्महानिः । तदुक्तं—

उदुह्यते दाक्षिणात्यै र्मातुलस्य सुता द्विजैः ।
मध्यदेशे कर्मकराः, शिल्पिन श्च गवाशिनः ।।
मत्स्यादाश्च नराः पूर्वे व्यभिचाररताः स्त्रियः ।
उत्तरे मद्यपा नार्य्यः स्पृश्या नृणां रजस्वलाः ।।
खशजाताः ( सहजाताः ) प्रगृह्णन्ति भ्रातृभार्य्यामभर्तृकाम् ।
अनेन कर्मणा नैते प्रायश्चित्तदमार्हकाः ।। (१.१२८-३०)

अर्थशास्त्रे कौटिल्येनानुरूपं प्रतिपादितं यथा—

देशस्य जात्याः सङ्घस्य धर्मो ग्रामस्य वापि यः ।
उचित स्तस्य तेनैव दायधर्मं प्रकल्पयेत् ।। (३.७.४०)

'पुस्तकरणे' इति यदुक्तं तदपि सङ्केतितमत्र—

अक्षपटलमध्यक्षः···निबन्धपुस्तकस्थानं कारयेत्। तत्राप्यधिकरणानां···देशग्रामजातिकुल-सङ्घानां धर्म-व्यवहारचरित्रसंस्थानं···निबन्धपुस्तकस्थं कारयेत् । ( अर्थशास्त्रे, २.७.१-२ )

राजा कथं व्यवहारदर्शनं कुर्य्यादित्यालोचनायां कात्यायनेन निर्देशितं यदादावेव शास्त्रानुसारं व्यवहारदर्शनं तदनन्तरं देशाचारमनुसृत्य व्यवस्थापनम् । तदुक्तं—

तस्माच्छास्त्रानुसारेण राजा कार्य्याणि साधयेत् ।
वाक्याभावे तु सर्वेषां **देशदृष्टेन** सन्नयेत् ।। (४५)

देशदृष्टस्यापि लक्षणं दत्तं कात्यायनेन—

यस्य देशस्य यो धर्मः प्रवृत्तः सार्वकालिकः ।
श्रुतिस्मृत्यविरोधेन देशदृष्टः स उच्यते ।। (४६) प्रति ।

विवदमानयोः अर्थिप्रत्यर्थिनोः समदेशीययो स्तथा भिन्नदेशीययो श्च व्यवहारदर्शने या व्यवस्थावलम्बनीया भवेत्तस्या अपि सङ्केत स्तत्रैवालोक्यते—

देशपत्तनगोष्ठेषु पुरग्रामेषु वासिनाम् ।
तेषां स्वसमयै र्धर्मशास्त्रतोऽन्येषु तैः सह ।। (४७)

पुस्तकरणस्यापि सङ्केतः प्रदर्शितः कात्यायनेन यतः भाषितं तेन यत् नृपतिना लेख्ययोगेन सा रक्षणीया स्वमुद्रादियोगेन । तदुक्तं—

देशस्यानुमतेनैव व्यवस्था या निरुपिता ।
लिखिता तु सदा धार्य्या मुद्रिता राजमुद्रया ।। (४८)

शास्त्रवद्यत्नतो रक्ष्या तां निरीक्ष्य विनिर्णयेत् ।
नैगमस्थै स्तु यत् कार्य्यं लिखितं यद् व्यवस्थितम् ।। (४९)
तस्मात् तत् संप्रवर्त्तेत नान्यथैव प्रवर्त्तयेत् ।। (५०)

इयं व्यवस्था अनादरदर्शनेन नोपेक्ष्या इत्यपि तद्भाषितं यथा—

प्रमाणदेशदृष्टं तु यदेवमिति निश्चितम् ।
अप्रवृत्तं कृतं यत्र श्रुतिस्मृत्यनुमोदितम् ।
नान्यथा तत् पुनः कार्यं न्यायापेतं विवर्जयेत् ।। (५१)

'राजाज्ञायां तु शासन'मिति यदुक्तं तत्र वक्तव्यमिदं यत् सदा राजा धर्मशास्त्रानुगं देशाचारानुमतं च यदेव राज्यपरिपालनार्थं कर्त्तव्यत्वेन निर्दिशति तद्राजशासनमिति परिगणितं भवेत् । कात्यायनेनायमेवार्थः लक्षणद्वारेण विस्पष्टीकृतः यथा—

न्यायशास्त्राविरोधेन देशदृष्टे स्तथैव च ।
यं धर्मं स्थापयेद्राजा न्याय्यं तद्राजशासनम् ।। (३८)

व्याख्यातं मित्रमिश्रपादेन वीरमित्रोदय-व्यवहारप्रकाशे (पृः ७)—

'न्यायशास्त्रं व्यवहारप्रतिपादकं स्मृत्यादिशास्त्रं, तदविरोधेन । देशदृष्टे देशाचारस्य अविरोधेनेति समासान्तर्गतस्य निकृष्यान्वयः । राजा यं धर्मं स्थापयेत् आज्ञापयेत् तत् न्याय्य मुक्त राजशासनम् । अन्यदन्याय्यमित्यर्थात् । तादृशशासनानुरोधेन निर्णयः कर्त्तव्य इत्यर्थः ।

पूर्वमेवावेदितं यत् धर्मव्यवहारादीनां प्रत्येकं द्वैविध्यं प्रदर्शितं बृहस्पतिना—'एकैको द्विविधः प्रोक्तः क्रियाभेदान्मनीषिभिः' (९.२) इत्यनेन । तेनैव राजाज्ञामाधिकृत्य भाषितम्—

प्रमाणसमतायां तु राजाज्ञा निर्णयः स्मृतः ।
शास्त्रसभ्याविरोधेन चतुर्थः परिकीर्त्तितः ।। ९.७ इति ।

बार्हस्पत्यवचनस्य व्याख्या एवं भवितुमर्हति यत् राजाज्ञा राजशासनं तदैव प्रामाणिकं भवेद्यदा सा आज्ञा शास्त्राविरोधिनी, सभ्यानां शास्त्रविदां मतानुगामिनी च भवेत् । इदं व्याख्यानं कात्यायनवचनानुगं (३८), दर्शितं च प्राक् । तस्याः राजाज्ञायाः प्रयोगः क्व भवेदित्याकाङ्क्षायां बार्हस्पत्यस्य श्लोकस्य आद्ये भागे प्रदर्शितं यत् पक्षद्वयेऽपि प्रमाणं यदा उपन्यस्तं, समबलत्वेन चालोक्यते, तत्र निर्णयार्थं राजा स्वकीयं मतमाज्ञारूपेण निर्दिशेत् ।

(इदमेवाकलनीयमत्र यद्बृहस्पतिवचनमिदं (९.७) न शुद्धपाठोपेतं यतः नानानिबन्धेषु पाठवैषम्यमालोक्यते । तत्तु Aiyanger-सम्पादिते बृहस्पतिस्मृतौ पादटीकायां (पृः ९५) समुल्लिखितं, द्रष्टव्यमेव) ।

पितामहवचनं स्मृतिचन्द्रिकाधृतं (II. पृः २६) स्मर्त्तव्यमत्र—

(यत्र चैते हेतवो न विद्यन्ते तत्र पार्थिववचनान्निर्णय इत्याह स एव)

लेख्यं यत्र न विद्येत न भुक्ति र्न च साक्षिणः ।
न च दिव्यावतारोऽस्ति प्रमाणं तत्र पार्थिवः ।

निश्चेतुं ये न शक्याः स्यु र्वादा सन्दिग्धरूपिणः ।
तेषां नृपः प्रमाणं स्यात् स सर्वस्य प्रभु र्यतः ।। इति ।

मानवीयधर्मशास्त्रे यदुल्लिखितं—

तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ।। (७.१३)

इति तत्र मेधातिथिभाष्यमनुसन्धेयं यथा—

'यतः सर्वतेजोमयो राजा तस्माद्धेतोरिष्टेषु वल्लभेषु मन्त्रिपुरोहितादिषु कार्य्यगत्या धर्मं कार्य्यव्यवस्थां शास्त्राचाराविरुद्धां व्यवस्येन्निश्चित्य स्थापयेन्न विचालयेत्, सा तादृशी राज्ञाऽनुज्ञा नातिक्रमनीया—'अद्य पूरे सर्वैरुत्सवः कर्तव्यः मन्त्रिगेहे विवाहो वर्त्तते । तत्र सर्वैः संनिधातव्यम् । तथा पशवो नाद्य सैनिकैः हन्तव्याः । न शकुनयो बन्धयितव्याः । नर्तिका धनिकैराराधनीया एतावन्त्यहानि' । एवमनिष्टेष्वपि—'एतेन संसर्गो न कर्तव्यः । एतस्य गेहे प्रवेशो न देयः' । एवम्विधोऽत्र धर्मः पटहघोषादिना राज्ञाऽदिष्टो नातिक्रमनीयः । न त्वग्निहोत्रादिधर्मव्यवस्थायै वर्णाश्रमिणां राजा प्रभवति स्मृत्यन्तरविरोधप्रसङ्गात् । अविरोधे चास्मिन् विषये वचनस्यार्थवत्त्वात्' ।

अर्थशास्त्रे कौटिल्येन 'शासनाधिकारे' (२.१०) यत् प्रपञ्चितं तदत्र समीचीनमिति कृत्वा उल्लेखमर्हति । तथाहि 'शासने शासनमित्याचक्षते'(२.१०.१) इत्युपक्रम्य प्रतिपादितं तत्र यत् 'शासनप्रधाना हि राजानः, तन्मूलत्वात् संधिविग्रहयोः' (२.१०.२) । शासन-प्रणयने लेखकस्य गुणा अपि प्रदर्शिताः (२.१०.३-४), उल्लिखितञ्च यत् राज्ञा सर्वथा सर्वं तत्त्वतः विचार्य्य शासनं विधेयं यथा—

जातिं कुलं स्थानवयःश्रुतानि
कर्मर्धिशीलान्यथ देशकालौ ।
यौनानुबन्धं च समीक्ष्य कार्य्ये
लेखं विदध्यात् पुरुषानुरूपम् ।। (२.१०.५)

शासनानां प्रकारविशेषा अपि तेनैव निगदिताः—

प्रज्ञापनाज्ञापरिदानलेखा स्तथा परीहारनिसृष्टलेखौ ।
प्रावृत्तिकश्च प्रतिलेख एव सर्वत्रगश्चेति हि शासनानि ।। (२.१०.३८)

तेषां सर्वेषां शासनविशेषाणां विवरणादिकमपि प्रदर्शितं कौटिल्येन दिङ्मात्रमत्रो-ल्लिख्यते । तथाहि आज्ञालेखनमुद्दिश्य भाषितमर्थशास्त्रे—

भर्त्तुराज्ञा भवेद्यत्र निग्रहानुग्रहौ प्रति ।
विशेषेण तु भृत्येषु तदाज्ञालेखलक्षणम् ।। (२.१०.४०)

सर्वत्रगं शासनं पुनः अर्थशास्त्रोपदिष्टं यथा—

यत्रेश्वरांश्चाधिकृतांश्च राजा
रक्षोपकारौ पथिकार्थमाहुः ।
सर्वत्रगो नाम भवेत् स मार्गे
देशे च सर्वत्र च वेदितव्यः ।। (२.१०.४६)

शुक्रनीतिसारे (१.२६२-३११) राजशासनविषयकानि तथ्यानि उपलभ्यन्ते ।

शासनप्रसङ्गतः अर्थशास्त्रे लेखदोषादिकमपि प्रदर्शितं यथा—

'अकान्ति व्याघातः पुनरुक्तमपशब्दः संप्लव इति लेखदोषाः । (२.१०.५७) तत्र कालपत्रकमचारुविषमविरागाक्षरत्वमकान्तिः । पूर्वेण पश्चिमस्यानुपपत्ति र्व्याघातः । उक्तस्याविशेषेण द्वितीयमुच्चारणं पुनरुक्तम् । लिङ्गवचनकालकारकाणामन्यथाप्रयोगोऽपशब्दः । अवर्गे वर्गकरणं वर्गे चावर्गक्रिया गुणविपर्य्यासः संप्लवः । (२.१०.५८-६२)

उपसंहारश्च कृत स्तत्र—

सर्वशास्त्राण्युपक्रम्य प्रयोगमुपलभ्य च ।
कौटिल्येन नरेन्द्रार्थे शासनस्य विधिः कृतः ॥ (२.१०.६३)

एकादशसंख्यके श्लोके अपरार्क-धृत-पाठः प्रथमपादे यथा—'तत्र सभ्ये स्थितो धर्मो' । व्याख्यातञ्च टीकायां—सभ्यैकप्रमाणत्वाद्धर्मः सभ्ये स्थित इत्युच्यते ।

अन्यद्व्याख्यानं चात्र प्रसङ्गतः उल्लेख्यं यथा—'व्यवहारश्च साक्ष्यधीनो निर्णय इति व्यवहारः साक्षिषु स्थित इत्युच्यते । चरित्रं देशकालकुलधर्मः । तत् पुस्तकरणे [ पुस्तकान्तरे पाठः—लिखितकरणे स्थितम् । लिखिताः खलु देशादिधर्माः प्रमाणम् । दुष्टनिग्रहः शासनम् ] तद्राजाधीनत्वात्तस्यां स्थितमित्युच्यते । एषां च धर्मादीनां परं बलीयः । तद्यथा—वणिषु कृतापराधेषु वधरूपे दण्डधर्मे सत्यात् साक्षिवचनात् प्राप्ते साक्षिभिः 'वर्णानां हि वधो यत्र इति वचनानुसारादनृतेऽभिहिते व्यवहारेण वधरूपो दण्डधर्मो निवर्तते । व्यवहारोऽपि चरित्रेण बाध्यते यथा—साक्षिभिः साधितेऽप्याभीरस्त्रियाः पुरुषान्तरोपभोगे तद्दण्डे च व्यवहारतः प्राप्तेऽपि राजकुलाधिगतलिखितान्निवर्तते । एवं हि तत्र लिखितं आभीरस्त्रीणां व्यभिचारेऽपि सति दण्डो न ग्राह्यः इति । चरित्रमपि राजशासनेन बाध्यते । यथा ब्राह्मणादिगृहे राजपुरुषेण न प्रवेष्टव्यमिति देशधर्मो लिखितोऽपि ब्राह्मणादिगृहे व्यवस्थितोऽपि चौरादौ राजाज्ञया तद्गृहं प्रविश्य राजपुरुषेण नीयते ।'

( पृः ५९७, याज्ञवल्क्यसंहितायाः २।१ श्लोकमवलम्ब्य )

---

**सामाद्युपायसाध्यत्वा च्चतुःसाधन उच्यते ।**
**चतुर्णामाश्रमाणां च रक्षणात् स चतुर्हितः ॥ १२**

---

Wrongly printed in Jolly's edition as : सामाद्युपायसाध्यत्वात्......

---

**Eng. Trans.**—It is stated to have four means in as much as (a law suit) is decided by resorting to the four means beginning with *sāma* (conciliation) and others (namely, creation of division, bribery, and force). It is beneficial to the four (castes) because it protects the four orders (i.e. persons affiliated to the four orders of life as also of the four castes).

---

**असहायभाष्यम्**—सामभेदोपप्रदानदण्डै श्चतुर्भिरपि साधनोपायै र्यथावसरप्रयुक्तैः

साध्यते तेन चतुःसाधन उक्तः । एवं चायमस्खलितप्रवृत्तधर्मा व्यवहारः······चतुर्णामपि वर्णानामाश्रमाणां च रक्षणात् परिपालना च्चतुर्हितो भवतीति ।। १२

---

**भवस्वामिभाष्यम्**—पादः स्थानमित्युभयं विशेषितम् । इदानीं चतुःसाधनत्वं चतुर्हितत्वं चोच्यते । सामदानभेददण्डैः साध्यत इति चतुःसाधनः । सामसाधनः, 'सत्यं ब्रूहि विद्वत्कुलजोऽसि, शुभास्ते लोका भविष्यन्ती'ति । दानेन किञ्चिद् दत्त्वैकदेशमोक्षेणाभयदानेन वा । भेदेन तर्जनादिना । दण्डेन ताड़नधनादानादिना । चतुर्णामाश्रमाणामिति प्रदर्शनार्थत्वात् चतुर्णां वर्णानामपि रक्षणात् स चतुर्हितः ।। १२ ।

---

**नारदस्मृतितत्त्वप्रकाशिका**—व्यवहारस्य चतुर्विधत्वं साधनमूलत्वात् उपपादयति नारदः 'सामाद्युपायसाध्यत्वादि'त्यनेन । राजानमुद्दिश्य याज्ञवल्क्येन निर्देशः प्रदत्तः—

अरिर्मित्रमुदासीनोऽनन्तरस्तत्परः परः ।
क्रमशो मण्डलं चिन्त्यं सामादिभिरुपक्रमैः ।। इति (१.३४५) ।

तत्र विस्पष्टीकरणार्थमुत्तरे श्लोके प्रपञ्चितं यथा—

उपायाः साम दानं च भेदो दण्ड स्तथैव च ।
सम्यक्प्रयुक्ताः सिद्धेयु र्दण्ड स्त्वगतिका गतिः ।। १.३४६

विज्ञानेश्वरेण मिताक्षरायां व्याख्यातं तेषामुपायानां स्वरूपादिकम् । 'तत्र साम प्रियभाषणम्, दानं सुवर्णादिः, भेदो भेदकरणं तत्सामन्तादीनां परस्परतो वैरस्योत्पादनेन, दण्ड उपांशुप्रकाशाभ्यां धनापहारादिर्वधपर्यन्तोपकारः । एते सामादयः परिपन्थ्यादिसाधनोपायाः । एते च देशकालाद्यनुसारेण सम्यक्प्रयुक्ताः सिद्धेयुः । तेषां च मध्ये 'दण्डस्त्वगतिका गतिः', उपायान्तरसंभवे सति न प्रयोक्तव्यः । एतच्च पीड़नीयकर्शनीयाभिप्रायेण यातव्योच्छेत्तव्ययो स्तु दण्ड एव मुख्यः ।' इति ।

मिताक्षराकृता युक्तमेवाभिहितं यत्—'एते सामादयो न केवलं राज्यव्यवहारविषयाः, अपि तु सकललोकव्यवहारविषयाः । यथा—

अधीष्व पुत्रकाधीष्व दास्यामि तव मोदकान् ।
यद्वान्यस्मै प्रदास्यामि कर्णमुत्पाटयामि ते ।। इति ।

बालक्रीड़ायां विश्वरूपविरचितायामपि तेषामुपायानां व्याख्यानं प्रदत्तं यथा—'साम वाचिकं कायिकं च । दान दीयमानस्याकोपेन ग्रहणं स्वकीयस्य च दानम् । भेदः संहतयोरुपजप्यविश्लेषणम्, दण्डो हठात् प्रसाधनम् । तेऽमी व्यस्ताः समस्ताश्च यथार्हं योज्याः । आद्योपायत्रयक्षये दण्डः ।

तेषां प्रयोगः कुत्र स्यादित्याकाङ्क्षायां तत्रैव निर्देशितं यथा—'तत्रारि स्त्रिविधः, सहजः कृत्रिमो भूम्यनन्तरश्च । अनन्तरो दण्डसाध्य एव । तथा मित्रं सहजकृत्रिमानन्तरपरत्वेन । अनन्तरपरः सामोपप्रदानगोचरः । सामैवोदासीनेषु । अरिपक्ष्याः सर्वदा भेद्या एव । इत्येवमादिप्रकारो बहुधा प्रयोगानुसारात् द्रव्यशुद्धिवत् 'देशं कालं तथात्मान'मित्यवेक्ष्य सामादिप्रयुक्तिनियमः । (याज्ञवल्क्यसंहितायां १।३४२ श्लोकमुपजीव्य) ।

मानवीयं वचनमप्यत्रोदाहार्य्यम्। राजधर्मप्रकरणे सप्तमाध्याये मनुसंहितायाः अभिहितमादौ—

एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः।
तानानयेद्वशं सर्वं सामादाभिरुपक्रमैः ॥ ७.१०७

अनन्तरं प्रतिपादितं तेन—

यदि ते तु न तिष्ठेयुरुपायैः प्रथमै स्त्रिभिः।
दण्डेनैव प्रसह्यैतां श्छनकै र्वशमानयेत् ॥ ७.१०८

(शनकैः यादृशदण्डोपक्रम स्तेन इति मेधातिथिः। शनकैः लघुगुरुदण्डक्रमेण इति कुल्लूकभट्टः)।

सामादीना मुपायानां चतुर्णामपि पण्डिताः।
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये ॥ ७.१०९

रामायणे सुन्दरकाण्डे, (४१. २-३) यदुक्तं तदपि स्मर्त्तव्यमत्र—

अल्पशेषमिदं कार्य्यं दृष्टेयमसितेक्षणा।
त्रीनुपायानतिक्रम्य चतुर्थ इह दृश्यते ॥
न साम रक्षःसु गुणाय कल्पते
न दानमर्थोपचितेषु युज्यते।
न वेदसाध्या बलदर्पि जनाः
पराक्रमस्त्वेव ममेह रोचते ॥

नीतिवाक्यामृते उपायचतुष्टयमुपवर्णितं यथा—सामोपप्रदानभेददण्डाः उपायाः। (पृः ३३२)

उल्लेख्यमिदं विशेषतः यत् *Hāthigumpha Inscription* (खीष्टपूर्व-द्वितीय शताब्द्यामियं कृतेति अनुमीयते) नृपतिः खारवेलः उद्घोषयति यद्भरतवर्षे तस्य राज्यशासनस्य दशमे वर्षे दण्ड-सन्धि-साम-नीतिमनुसृत्य युद्धोद्योगः विहितः। तथाहि—

'…दशमे छ वसे दंडसंधि-सा(म)मयो भरधवस-पठानं मह(ि)जयन्…कारापयति… प(ा)यातानं छ मन(इ)-रत्नानि उपलभते……

(द्रष्टव्यम्—*Epigraphia Indica*, Vol. XX. pp. 79, para 10)

कौटिल्येन उपायानां विवरणादिकं सविस्तरं प्रदर्शितं यथा—

'उपायाः सामोपप्रदानभेददण्डाः। (२.१०.४७)

तत्र साम पञ्चविधम् गुणसंकीर्त्तनं, संबन्धोपाख्यानं, परस्परोपकारसंदर्शनम्, आयतिप्रदर्शनम्, आत्मोपनिधानमिति। (२.१०.४८)। तत्राभिजनशरीरकर्मप्रकृतिश्रुतद्रव्यादीनां गुणग्रहणं प्रशंसा, स्तुति र्गुणसंकीर्त्तनम्। ज्ञातियौनमौखस्रौवकुलहृदयमित्रसंकीर्त्तनं संबन्धोपाख्यानम्। स्वपक्षपरपक्षयोरन्योन्योपकारसंकीर्त्तनं परस्परोपकारसंदर्शनम्। 'अस्मिन्नेवं कृत इदमावयो र्भवति' इत्याशाजननमायतिप्रदर्शनम्। 'योऽहं स भवान्। यन्मम द्रव्यं तद्भवता स्वकृत्येषु प्रयोज्यताम्, इत्यात्मोपनिधानम्'। इति। (२.१०.४९-५३)। उपप्रदानमर्थोपकारः।

(२.१०.५४) । शङ्काजननं निर्भर्त्सनं च भेदः । (२.१०.५५) वधः परिक्लेशोऽर्थहरणं दण्डः । (२.१०.५६) ।

व्यवहारस्य चतुर्हितत्वं यन्नारदेन निगदितं तत्र कारणत्वेनोपदर्शितं यत् व्यवहारदर्शनद्वारेण नृपतिः खलु आश्रमचतुष्टयं यथायथं रक्षति । आश्रमाः चत्वार एव, परन्तु तेषां नामकरणे शास्त्रकृतां वर्त्तते मतान्तरम् । गौतमः तदीये धर्मशास्त्रे ब्रह्मचारी गृहस्थः भिक्षु वैखानसः इत्याश्रमचतुष्टयं निर्दिशति (३।२) । तत्र मिताक्षराभिधेयायां टीकायां हरदत्तः—शाखान्तरेषु वैखानस स्तृतीयो भिक्षुश्चतुर्थ आश्रमः । इह तु क्रमभेदः प्रागुक्ता स्त्रय आश्रमिण इत्यत्र वैखानसवर्जनार्थः । आपस्तम्बेन धर्मसूत्रे उल्लिखितं—'चत्वार आश्रमा गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थ्यमिति । (२.९.२१.१) । ब्रह्मचारी, गृहस्थः, वानप्रस्थः परिव्राजक श्चेति चत्वारः आश्रमा इत्युक्तं वसिष्टधर्मशास्त्रे (७.१-२) । बौधायनेन तदीये धर्मसूत्रे नवीनमाश्रमविषयकं तथ्यं परिवेशितं यत् कपिलेन प्रह्लादसुतेन आश्रमावान्तरविभागः प्रदर्शितः । तत्र अनादरप्रदर्शनं विधेयमिति । तदुक्तं तत्र—

'ऐकाश्रम्यं त्वाचार्य्या अप्रजननत्वादितरेषाम् । तत्रोदाहरन्ति—

प्राह्लादि र्वै कपिलो नामासुर आस । स एतान् भेदां श्चकार दैवैः स्पर्धमान, स्तान् मनीषी नाद्रियेत । (बौ. धर्म. सूत्रे, २.६.२९-३१)

भगवता मनुना आश्रममधिकृत्य प्रदर्शितं—

ब्रह्मचारी गृहस्थ श्च वानप्रस्थो यति स्तथा ।
एते गृहस्थप्रभवा श्चत्वारः पृथगाश्रमाः ।। (६.८७)

अन्यदपि मानवीयं वचनं द्रष्टव्यं यत्र सन्न्यासस्य उल्लेखः, यथा—

एवं संन्यस्य कर्माणि स्वकार्य्यपरमोऽस्पृहः ।
संन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् ।। ६।९६

इदं चावधेयं यत् चतुर्थस्याश्रमस्य संज्ञाविशेषाः क्वचिद् परिव्राट् परिव्राजको वा, क्वचिद्वा भिक्षुः, अन्यत्र मुनिः, कदाचिद्वा यतिरिति ।

तत्र कदा केन कस्यामवस्थायाञ्च आश्रमाश्रितत्वं तदुपजीव्य विचारणा काचिदपेक्षिता । तत्र पक्षाः अनेके वर्तन्ते—समुच्चय-विकल्प-बाधभेदात् । मानवीयं वचनं स्मरणीयमत्र—

चतुर्थमायुषो भागमुषित्वाऽद्यं गुरौ द्विजः ।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ।। ४.१

कुल्लूकभट्टेन प्रपञ्चितमत्र यत्—'आश्रम-समुच्चयपक्षमाश्रितो ब्राह्मण उक्तब्रह्मचर्य्यकालं जन्मापेक्षाद्यं यथाशक्ति गुरुकुले स्थित्वा द्वितीयमायुषश्चतुर्थभागं गृहस्थाश्रममनुनिष्ठेत् ।

तत्रैव मानवे धर्मशास्त्रे यदन्यदभिहितं—

एवं गृहाश्रमे स्थित्वा विधिवत् स्नातको द्विजः ।
वने वसेत्तु नियतो यथावद्विजितेन्द्रियः ।। ६.१

तत्र मेधातिथिव्याख्याने भाषितं यत् समुच्चयपक्षमाश्रित्यैतदुक्तमिति । अन्यथाऽविप्लुतब्रह्मचर्यादपि वनवासो विद्यत इत्येतदपि वक्ष्यते ।

मनुना स्पष्टमेवोद्धोषितं यदाश्रमक्रमं विहायाचरणे दोषादिकं भवेत् । तथा हि—

अनधीत्य द्विजो वेदाननुत्पाद्य तथा प्रजाम् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ।। ६.३७

पुनरपि मानवीये श्लोके (६.८७) आश्रमचतुष्टयस्य उल्लेखानन्तरं यदुक्तम्—'एते गृहस्थप्रभवा श्चत्वारः पृथगाश्रमाः' इति तत्र मेधातिथिभाष्ये द्रष्टव्यम्—
तस्माद् गृहस्थादितुल्यतया संन्यासिकं प्रशंसितुमाश्रमान्तरसंकीर्तनम् । तच्च समुच्चयं द्रढयितुम् ।

जावालोपनिषदि (४) अपि अस्य संकेत उपलभ्यते । तथाहि—

ब्रह्मचर्य्यं परिसमाप्य गृही भवेद् गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेत् । यदि वेतरथा ब्रह्मचर्य्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा । यदहरेव विरजेत्तदहरेव प्रव्रजेत् ।

द्रष्टव्यमत्र बौधायनधर्मसूत्रं (२.१०.२ ; १८) : सोऽत एव ब्रह्मचर्य्यवान् प्रव्रजतीत्येकेषाम् आश्रमादाश्रममुपनीय ब्रह्मभूतो भवतीति विज्ञायते ।

'तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः' इति ब्रह्मसूत्रमवलम्ब्य (३.४.४०) शाङ्करे भाष्येऽपि विषयेऽस्मिन् विचारावतारः विहितः, तत्र बहुश्रुतिवाक्यानामुल्लेखानन्तरमालोचनमपि आलोक्यते ।

गौतमेन तदीये धर्मसूत्रे विकल्पस्य मतमपि केचित् पोषयन्ति इति सूत्रितं—'तस्याश्रमविकल्पमेके ब्रुवते' (३.१) इत्यनेन । तदनन्तरं तु मन्ये सिद्धान्तरूपेण अपरं सूत्रं प्रदर्शितं यत्र गार्हस्थ्याश्रमस्यैव प्राधान्यमुद्घोषितम् यथा—'ऐकाश्रम्यं त्वाच्चार्य्या प्रत्यक्षविधानाद् गार्हस्थ्यस्य' (३.३५) ।

स्मरणीयमत्र यद्बौधायनधर्मसूत्रेऽपि अनुरूपं गार्हस्थ्याश्रमप्रशंसात्मकं सूत्रमुपलभ्यते यत्र सकारणं अस्य प्राशस्त्यस्य निर्देशः । तस्य वक्तव्यमिदं यच्चास्मिन्नेवाश्रमे स्थित्वा आनृण्यात्मकं कर्म सम्पाद्यं येन उत्तमविवाहेन गृही पुत्रमुत्पाद्य आत्मानं ऋणान्मोचयति । तथा तथा च सूत्रम्—'ऐकाश्रम्यं त्वाचार्य्या अप्रजननत्वादितरेषाम् ।...'प्रजाभिरग्ने अमृतत्वमश्याम्' (ऋः, ५.४.१० ; तैः संः, १.४.४६.१) । जायमानो वै ब्राह्मण स्त्रिभि ऋंणवा जायते—ब्रह्मचर्य्येणर्षिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्य (तैः संः, ६.३.१०. ५) इति । (२.६.२९ ; ४२-४३)

मन्ये एतदेवाभिप्रेत्य मनुना गार्हस्थ्यस्य प्रशंसनमुद्घोषितं यथा—

सर्वेषामपि चैतेषां वेदस्मृतिविधानतः ।
गृहस्थः उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि ।। ६।८९
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ।। ६।९०

पुनश्च भाषितं भगवता मनुना—

ब्रह्मचारी गृहस्थश्च वानप्रस्थो यति स्तथा ।
एते गृहस्थप्रभावा श्चत्वारः पृथगाश्रमाः ।। ६।८७

स्मरणीयं विष्णुस्मृतौ यदुद्घोषितं—

ब्रह्मचारी यति भिक्षु जीवन्त्येते गृहाश्रमात् । ५९.२६

अन्यदपि तत्रैव—

गृहस्थ एव यजते गृहस्थ स्तप्यते तपः ।
प्रददाति गृहस्थश्च तस्माच्छ्रेष्ठो गृहाश्रमी ।। ५९.३८
ऋषयः पितरो देवा भूतान्यतिथय स्तथा ।
आशांसते कुटुम्बिभ्य स्तस्माच्छ्रेष्ठो गृहाश्रमी ।। ५९.२८

विषयेऽस्मिन् विशेषतः बादरायणसूत्रद्वयमुल्लेख्यं यथा—

परामर्शं जैमिनिरचोदना चापवदति हि । ३.४.१८
अनुष्ठेयं बादरायणः साम्यश्रुतेः । ३.४.१९

शाङ्करं भाष्यमत्र द्वितीये सूत्रे अनुसन्धेयं यथा—

'अनुष्ठेयमाश्रमान्तरं बादरायणः आचार्य्यो मन्यते । वेदे श्रवणात् । अग्निहोत्रादीनां चावश्यानुष्ठेयत्वात्तद्विरोधानधिकृतानुष्ठेयमाश्रमान्तरमिति हीमां मतिं निराकरोति गार्हस्थ्यवदेवाश्रमान्तरमप्यनिच्छता प्रतिपत्तव्यमिति मन्यमानः, कुतः, साम्यश्रुतेः । समा हि गार्हस्थ्येनाश्रमान्तरस्य परामर्शश्रुति दृश्यते—'त्रयो धर्मस्कन्धाः' (छा, २.२३.१) इत्याद्या । यथेह श्रुत्यन्तरविहितमेव गार्हस्थ्यं परामृष्टमेवमाश्रमान्तरमपीति प्रतिपत्तव्यम् । यथा च शास्त्रान्तरप्राप्तयोरेव निवीतप्राचीनावीतयोः परामर्श उपवीतविधिपरे वाक्ये । तस्मात्तुल्यमनुष्ठेयत्वं गार्हस्थ्येनाश्रमान्तरस्य ।......

अपरं सूत्रमत्र—विधि र्वा धारणवत् । ३।४।२०

भाष्यमत्र—विधि र्वाऽयमाश्रमान्तरस्य, न परामर्शमात्रम् ।

यतिधर्मप्रकरणे याज्ञवल्क्यसंहितायाः (३।५६)

वनाद् गृहाद्वा कृत्वेष्टिं सर्व वेदसदक्षिणाम् ।
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ।। ३।५६
अधीतवेदो जपकृत् पुत्रवानन्नदोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ।। ३।५७

इति श्लोकद्वयस्य व्याख्यानप्रसङ्गात् विज्ञानेश्वरेणातिविस्तृतमालोचनं विहितम् । तदुक्तं तेन —'यावता कालेन तीव्रतपःशोषितवपुषो विषयकषायपरिपाको भवति पुनश्च मदोद्भवाशङ्का नोद्भाव्यते तावत्कालं वनवासं कृत्वा तत्समनन्तरं मोक्षे मनः कुर्यात् । 'वन-गृह' शब्दाभ्यां तत्सम्बन्ध्याश्रमो लक्ष्यते । 'मोक्ष'शब्देन च मोक्षैकफलकश्चतुर्थाश्रमः । अथवा गृहाद्-गार्हस्थ्यादनन्तरं मोक्षे मनः कुर्यात् । अनेन च पूर्वोक्तश्चतुराश्रमसमुच्चयपक्षः पाक्षिक इति द्योतयति । तथा च विकल्पो जाबालश्रुतौ श्रूयते—'ब्रह्मचर्य्यं परिसमाप्य गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत् । यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा' इति । तथा गार्हस्थ्योत्तराश्रमबाधश्च गौतमेन दर्शितः—'ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद् गार्हस्थ्यस्य' इति । एतेषां च समुच्चयविकल्पबाधपक्षाणां सर्वेषां श्रुति-

मूलत्वादिच्छया विकल्पः । अतो यत्कैश्चित् पण्डितंमन्यैरुक्तं—'स्मार्त्तत्वान्नैष्ठिकत्वादीनां गार्हस्थ्येन श्रौतेन बाधः गार्हस्थ्यानधिकृतयान्धक्लीबादिविषयता वा' इति तत् स्वाध्याया-ध्ययनवैधुर्य्यनिबन्धनमित्युपेक्षणीयम् ।

आपस्तम्बेन तदीये धर्मसूत्रे आश्रमचतुष्टयमुक्तं नाम्ना निर्दिश्य यथा—

चत्वार आश्रमा गार्हस्थ्यमाचार्य्यकुलं मौनं वानप्रस्थ्यमिति । २.९.२१.१

तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः मोक्षं गच्छति । २.९.२१.२

अष्टमं सूत्रमस्मिन् प्रकारणे यत्—'अतएव ब्रह्मचर्य्यवान् प्रव्रजति' (२.९.२१.८) । तदुपजीव्य हरदत्तेन उज्ज्वलाभिधेयायां टीकायां बाहुल्येन विचारितं, तदनुसन्धेयम् । आपस्तम्बेन पुनः न कस्यचिदाश्रमस्य ऐकान्तिकं श्रेष्ठत्वमावेदितमिति ज्ञायते तदुक्त्या—

'न तु तज्ज्यैष्ठ्यमाश्रामाणामिति' सूत्रेण । (२.९.२४.१४)

यथा तथा भवतु, अलमतिजल्पितेन । प्रतिपाद्यमत्र नारदीये वाक्ये यत् चतुर्विधा-नामाश्रमविशेषे स्थितानां प्रजानां रक्षणं राजा व्यवहारदर्शनद्वारेण सम्पादयतीति कृत्वा व्यवहारस्य चतुर्हितत्वमत्राभिहितम् । व्यवहारेण कथमाश्रमस्य रक्षणं सम्भवतीति चेत्तत्रोच्यते यद्व्यवहारदर्शनादादौ दोषनिरूपणं, ततः दण्डविधानं, दण्डभयाच्च प्रजाः सर्वाः आश्रमस्थाश्च स्वस्वकर्मणि नियुक्ताः भवन्ति । तेन च सर्वेषां जनानामाश्रमस्थितानां कल्याणमेवोपजायते । याज्ञवल्क्यीयं वचनमत्र स्मर्त्तव्यं सारतया—

कुलानि जातीः श्रेणीश्च गणान् जानपदानपि ।
स्वधर्मचलितान् राजा विनीय स्थापयेत् पथि ।। १.३६१ इति ।

————

कर्तॄनथो[1] साक्षिणश्च सभ्यान् राजानमेव च ।
व्याप्नोति पादशो[2] यस्माच्चतुर्व्यापी ततः स्मृतः ॥ १७ ।

१. कर्तॄंस्तथा Sm. c ; II. 25 ; २. यादृशो, Vy. Pr. p. 5.

**Eng. Trans. :** *Vyavahāra* is stated to be affecting or rather extending to the four (categories of persons) in as much as it is concerned to the extent of one quarter each to all the four, namely, the person committing the offence (*Kartṛn*), the witnesses, the members of the court (adjudicating the case) and the king himself (perhaps because the final punishment is awarded by the king).

**असहाय-भाष्यम्**—स च सुदृष्टो भवति ततश्चतुरोऽप्येतान् पादशो धर्मरूपेण व्याप्नोति । अथ कुदृष्टो भवति, तत स्तानेव पापरूपेण व्याप्नोति—इति चतुर्व्यापीति । १३ ।

**भवस्वामि-भाष्यम्**—कर्तृसाक्षि-सभ्यनृपाणां पादशो व्यापनादसम्यक् दर्शन-निमित्तस्याधर्मस्य सम्यग्दर्शननिमित्तस्य धर्मस्य च व्याप्तेश्चतुर्व्यापीत्युच्यते ।

**नारदस्मृतितत्त्वप्रकाशिका**—व्यवहारपदस्य स्वरूपमधिकृत्य विश्लेषितं प्राग्बाहुल्येन । व्यावहारपदं नाम किमिति— प्रश्ने याज्ञवल्क्यीयं वचनम्—

स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥ १।१)) इति उल्लिखितम् ।

आधिक्येन चात्र भट्टनीलकण्ठकृते **व्यवहारमयूखे** (सं, P. V. Kane, Bombay Sanskrit and Prakrit Series, No. LXXX, 1926 ; पृः १) यदुक्तं व्याख्यात्मकतया तन्निवेद्यते यथा—'विप्रतिपद्यमान-नरान्तरगताज्ञाताधर्मज्ञापनानुकूलो व्यापारो व्यवहारः। वादिप्रतिवादिकर्तृकः संभवद्भोगसाक्षिप्रमाणको विरोधिकोटिव्यवस्थापनानुकूलो वा व्यापारः सः। संप्रतिपत्त्युत्तरे तु व्यवहारपदप्रयोगो भाक्त इति **मदनरत्ने** । वादवितण्डादिव्यापृत्त्यर्थमुत्तरदलम् ।'

व्यवहारदर्शनं नृपाणां वैशेषिकं कर्त्तव्यमेव प्रजारक्षणात्मकमिति
'व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञै र्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ॥' ( म. सं. ८।१ ),

इति भगवता मनुना ; तथा—'व्यवहारान्' नृपः पश्येद्विद्वद्भि र्ब्राह्मणैः सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥ (याः स्मृ, १।२) इति

याज्ञवल्क्येन च ; तथा—'द्रष्टा च व्यवहाराणां राजा दण्डधरः स्मृतः' (ना. स्मृ. २।१) इति नारदेन ; उद्घोषितम् । मनुसंहितायाः अष्टमाध्यायस्य प्रथमश्लोके यद्विहितं भगवता, तस्य भाष्यरूपेण प्रपञ्चितं मेधातिथिना तद्भाष्ये यत् प्रजापालनं राजकृतं तावत्—पीड़ापहारः,

द्वयी च पीड़ा दृष्टा अदृष्टा चेति। तत्र दैर्बल्यस्य बलीयसा धनहरणादिना बाध्यमानता दृष्टा पीड़ा। इतरस्य तु विध्यतिक्रमजनितेन प्रत्यवायेनामुत्रिकदु:खोत्पादेन अदृष्टपीड़ा। प्रजा हि द्वेषमत्सरादिभिरितरेतरमयथावदाचरन्ति कुपथेन च यान्त्यदृष्टदोषेण बाध्येरन्। अतश्च राज्यनाश:; प्रजैश्वर्य्यं हि राज्यमुच्यते। तासु विनश्यन्तीषु कस्य राज्यं स्यात्। व्यवहारादयोऽतो यथाशास्त्रदण्डेन व्यवस्थाप्यमाना न भयात् पृथक् प्रचलन्ति। तथा चोभयथापि रक्षिता भवति धनदण्डश्च राज्ञ: करशुल्कादि वैतदन्यधर्मिष्ठजीविका न भवतीति वृत्तिपरिक्षयादपि राज्यावसाद:। अत: राज्यस्थित्यर्थं व्यवहारदर्शनं कर्त्तव्यम्।

...द्वितीयश्लोकस्य भाष्ये पुनरभिहितं मेधातिथिना—'ईदृशस्य च दर्शनस्यान्येषामसम्भवादनधिकार: ; संशयच्छेदमात्रं फलतु व्यवहारदर्शनं प्रायश्चित्तोपदेशवद्विदुषो ब्राह्मणस्यास्त्येव। उक्तं हि—धर्मसङ्कटेषु ब्रूयादिति।

अस्मिन् नारदीय-वचने 'कर्त्तृन्' इति पदं 'दोषकर्त्तृन्' इत्यर्थं ज्ञापयति। यत: राजसकाशमावेदनादनन्तरं फलावाप्ति: निर्णयात्मिका या व्यवस्था सा याज्ञवल्क्येन व्यवहाराध्यायस्य षष्ठसंख्यकात् श्लोकादारभ्य अष्टमश्लोकं यावत् (चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शित:, २।८) प्रतिपादितम्। तत्र सर्वत्र दोषकृदेव मुख्योऽभिधेय: यमुद्दिश्य सर्वमिदं व्यवहाररूपेतिकर्त्तव्यतादिकं प्रवर्त्तते।

आवेदक: प्रतीकारार्थं स्ववक्तव्यस्य दृढ़ीकरणार्थं च याज्ञवल्क्यानुसारं 'ततोऽर्थी लेखयेत् सद्य: प्रतिज्ञातार्थसाधनम्', (२।७) इति स्मृत्वा साधनं निर्दिशेत्, तच्च साधनं किमित्यपेक्षायां भणितं तेनैव—

'प्रमाणं लिखितं भुक्ति: साक्षिणश्चेति कीर्तितम्।
एषामन्यतमाभावे दिव्यान्यतममुच्यते।। (या, २।२२)

नारदवचनमप्यत्र—

प्रमाणानि प्रमाणस्थै: परिकल्प्यानि यत्नत:।
सीदन्ति हि प्रमेयानि प्रमाणैरव्यवस्थितै:।। १।६८
लिखितं साक्षिणो भुक्ति: प्रमाणं त्रिविधं स्मृतम्।
धनस्वीकरणे येन धनी धनमवाप्नुयात्।। १।६९

तत्र प्रमाणेषु साक्षिरूपप्रमाणस्य वैशिष्टयं वर्त्तते एव। मानवीयं वचनमत्र—

समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति। (८।७४)

अस्य व्याख्याप्रसङ्गे मेधातिथिपादेन विश्लेषितं यत् 'समक्षदर्शनात् साक्षादनुभवाच्छ्रवणाच्च साक्ष्यशब्दानुषङ्ग: कर्त्तव्य:। यत: कुतश्चिदेकेन श्रूयते ततोऽन्येन तत्परम्पराश्रुतं तेन परम्पराश्रयी न साक्षी यथैतेनेदमकार्य्यं कृतमिदमस्मै वा धारयतीति लोकप्रसिद्ध्यावगतम्।

अन्यदप्युक्तं मेधातिथिना यत् समक्षदर्शनग्रहणञ्च प्रमाणमात्रोपलक्षणार्थम्। तेनानुमानादिनाप्यनुभूतमेव। अत: आप्तागमाश्च तस्य प्रत्यक्षमिव प्रमाण'मिति। (८।७४ श्लोकमधिकृत्य)।

विष्णुधर्मसूत्रे (८.१३) : 'समक्षदर्शनात् साक्षी श्रवणाद्वेति'—सूत्रितमनुरूपम्। तथैव महाभारते—'समक्षदर्शनात् साक्षी श्रवणाच्चेति धारणात्' ( सभापर्वणि, ६८.१४) ।

स्मर्तव्यमत्र कात्यायनीयं वचनं यत्र समक्षदर्शनस्य संकेतः प्रदत्तः—

अर्थिप्रत्यर्थिसांनिध्यादनुभूतं तु यद्भवेत् ।
तद् ग्राह्यं साक्षिणो वाक्यमन्यथा न बृहस्पतिः ।। ३४६

पाणिनिसूत्रमत्र स्मर्तव्यम्—'साक्षाद्द्रष्टरि संज्ञाया'मिति (५।२।९१)। श्रुतौ श्वेताश्वतरोपनिषदि ( ६.११) परमपुरुषस्यैकस्य स्वरूपविश्लेषणावसरे 'साक्षीति' पदस्य प्रयोग उपलभ्यते—'एको देवः सर्वभूतेषु गूढ़ः···साक्षी चेता केवलो निर्गुणश्चेति' ।

गौतमधर्मसूत्रे सूत्रितं—'विप्रतिपत्तौ साक्षिनिमित्ता सत्यव्यवस्था' (१३.१) इति । तथैव कौटिलीये अर्थशास्त्रे च—'असंप्रतिपत्तौ तु साक्षिणः प्रमाण'मिति (३.११.२७). नारदस्मृतौ साक्षिविषयमधिकृत्य बाहुल्येन विचारितं ; तच्च तत्रैव विचारावसरे स्पष्टीभविष्यति । दिङ्मात्रमत्रोल्लिख्यते—

सन्दिग्धेषु च कार्य्येषु द्वयोर्विवदमानयोः ।
श्रुतदृष्टानुभूतार्थात् साक्षिभ्यो व्यक्तिदर्शनम् ।। (१.१४७)

समक्षदर्शनात् साक्षी विज्ञेयः श्रोत्रचक्षुषोः ।
श्रोत्रस्य यत् परो ब्रूते चक्षुषो दर्शनं स्वयम् ।। ( १.१४८ )

साक्षिविषयकानि तथान्यान्यानि यथाप्रदेशं विशिष्टं व्याख्यानमर्हन्तीति नात्र विचाराबाहुल्यं भजते । सिद्धमिदं यद्व्यवहारनिर्णये साक्षिणामुपयोगित्वं स्वीकृतमेव । अतएव अनृतभाषणादिकं कौटसाक्ष्ये दण्डास्पदं भवति इति तत्र तत्र निर्देश्यम् ।

व्यवहारदर्शनं राज्ञः मुख्यं कर्त्तव्यमित्यावेदितं प्राक् । अशेषगुणोपेतोऽपि राजा एकाकी व्यवहारं न पश्येत् । युक्तमुक्तं शुक्रनीतिसारे—'नैकः पश्येच्च कार्याणि' इति ( ४.५.६ ) । सरस्वतीविलासाख्ये ग्रन्थे पितामहवचनमुद्धृतं यत्र एकाकिना राज्ञा विधिज्ञेनापि व्यवहारदर्शनं न करणीयमिति—'तस्मान्न वाच्यमेकेन विधिज्ञेनापि धर्मत' इति । तदनुसारं सङ्केतितं तत्र—···इति पितामहेन एकस्य धर्मकथननिषेधात् । (पृ, ६७) शुक्रनीतिसारेऽपि निर्देशितं—

नैकः पश्येच्च कार्य्याणि वादिनोः शृणुयाद्वचः ।
रहसि च नृपः प्राज्ञः सभ्याश्चैव कदाचन ।।
पक्षपाताधिरोपस्य कारणानि च पञ्च वै ।
रागलोभभयद्वेषा वादिनोश्च रहःश्रुतिः ।। (४।५.६-७)

पितामहः निर्णये राज्ञः प्राधान्यमभ्यङ्गीकरोति क्वचित् । देवणभट्टेन स्मृतिचन्द्रिकायां तद्वचनमुल्लिखितं—

लेख्यं यत्र न विद्येत न भुक्ति र्न च साक्षिणः ।
न च दिव्यावतारोऽस्ति प्रमाणं तत्र पार्थिवः ।।

निश्चेतुं ये न शक्याः स्युर्वादाः सन्दिग्धरूपिणः ।
तेषां नृपः प्रमाणं स्यात् स सर्वस्य प्रभुर्यतः ।। (व्य. प्र, II, पृ: १६)

राजा स्वयं विचारं साधयितुमर्हति क्वचिदिति **गौतमधर्मसूत्रे** निगदितं सङ्केतेन । तथाहि तत्र सूत्रत्रयम्—

स्तेनः प्रकीर्णकेशो मुसली राजानमीयात् कर्माचक्षाणः । १२.४०
पूतः वधमोक्षाभ्याम् । १२,४१

अघ्नन्नेनस्वी राजा । १५.४२. (द्रष्टव्यं गौतमधर्मसूत्रं—मस्करिभाष्यसहितम् । Government Oriental Library Series. Mysore, 1917)

भगवता मनुनापि एवम्विधस्य नृपकर्मणः विवरणं प्रदत्तं—

राजा स्तेनेन गन्तव्यो मुक्तकेशेन धावता ।
आचक्षणेन तत् स्तेयमेवं कर्मास्मि शाधि माम् ।। ८।३१४
स्कन्धेनादाय मुसलं लगुडं चापि खादिरम् ।
शक्तिं चोभयतस्तीक्ष्णामायसं दण्डमेव वा ।। ८।३१५

(गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम् ।
वधेन शुध्यते स्तेनो ब्राह्मणस्तपसैव वा ।।)
शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते ।
अशासित्वा तु तं राजा स्तेनस्याप्नोति किल्बिषम् ।। ८।३१६

कल्हान-विरचितायां राजतरङ्गिण्यां (६.१४-४१) यशस्कराख्यस्य नृपतेः विवरणमत्रानुकूलमनुधावनीयम् । परन्त्वत्र **कात्यायन**-विहितं वचनं स्मर्त्तव्यम् । यथा—

अस्वर्ग्या लोकनाशाय परानीकभयावहा ।
आयुर्बीजहरी राज्ञां सति वाक्ये स्वयं कृतिः ।। (४४)
तस्माच्छास्त्रानुसारेण राजा कार्य्याणि साधयेत् ।
वाक्याभावे तु सर्वेषां देशदृष्टेन सन्नयेत् ।। (४५)

अनेन वचनेन स्थितमिदं सुस्पष्टं यत् क्वचित् राजा स्वयं व्यवहारकार्य्याणि कर्त्तुं शक्नोति, परन्तु तत् कर्म सर्वथा शास्त्रानुसारेण कर्त्तव्यम् ।

प्रसङ्गतः स्मर्त्तव्यमिदं 'यद्राजधर्म'–इति कथनादेव राजधर्मस्य च शास्त्रदिष्वनेकशः प्राशस्त्यकीर्त्तनात् राज्ञः प्राधान्यं व्यवहारनिर्णयेऽवधेयम् । तदुक्तं भारते—

एवं धर्मान् राजधर्मेषु सर्वान् सर्वावस्थं संप्रलीनान् निबोध ।
सर्वा विद्या राजधर्मेषु युक्ताः सर्वे लोकाः राजधर्मे प्रविष्ठाः ।
सर्वे धर्मा राजधर्मप्रधानाः । (शान्तिपर्वणि—६३, २५, २६, २९)

राजमूला महाभाग योगक्षेमसुवृष्टयः ।
प्रजासु व्याधयश्चैव मरणं च भयानि च ।।

कृतं त्रेता द्वापरं च कलिश्च भरतर्षभ ।
राजमूला इति मति र्मम नास्त्यत्र संशयः ।। (शान्ति, १४१, ९-१०)
सर्वस्य जीवलोकस्य राजधर्मः परायणम् । (शान्ति, १.५६.२)

द्रष्ठव्यं शुक्रनीतिसारे (४.१.६०) :

युगप्रवर्त्तको राजा धर्माधर्मप्रशिक्षणात् ।
युगानां न प्रजानां न दोषः किन्तु नृपस्य तु ।।

राज्ञः राजभावः कथङ्कारं सञ्जायते इति प्रश्ने बार्हस्पत्यं वचनं निर्देशमर्हति यथा—

बलेन चतुरङ्गेण यतो रञ्जयते प्रजाः ।
दीप्यमानः स्ववपुषा तेन राजाऽभिधीयते ।। (बृ:, १.६६)

राजगुणाः कात्यायनेन विशेषतः उल्लिखिताः दिङ्मात्रमत्र प्रदर्श्यते यथा—

विनीतः शास्त्रसम्पन्नः कोशशौर्य्यसमन्वितः । (कात्यायनस्मृतिसारोद्धारे
ब्रह्मण्यो दानशीलः स्यात् सत्यधर्मपरो नृपः ।। १ श्लोकसंख्या-१)
स्तम्भोपातापपैशुन्यचापल्यक्रोधवर्जितः ।
प्रगल्भः सन्नतोदग्रः संभाषी प्रियदर्शनः ।। २
वश्येन्द्रियं जितात्मानं धृतदण्डं विकारिषु ।
परीक्ष्यकारिणं धीरमत्यन्तं श्री निषेवते ।। ३

पुनरप्युक्तं—

शौर्य्यं विद्यार्थबाहुल्यात् प्रभुत्वाच्च विशेषतः ।
सदा चित्तं नरेन्द्राणां मोहमायाति कारणात् ।। ४
तस्माच्चित्तं प्रबोद्धव्यं राजधर्मे सदा द्विजैः ।।
पवित्रं परमं पुण्यं स्मृतिवाक्यं न लङ्घयेत् ।। ५

तत्र सर्वथा दौर्बल्यादिकं परिहृत्य तत्त्वान्वेषणे यत्नवता राज्ञा भवितव्यमन्यथा अनर्थपाताशङ्का इति द्योतितं कात्यायनेन—

सुराध्यक्षश्च्युतः स्वर्गान्नृपरूपेण तिष्ठति ।
कर्त्तव्यं तेन तन्नित्यं येन तत्त्वं समाप्नुयात् ।। ८
आत्मीये संस्थिता धर्मे नृपाः शक्रत्वमाप्नुयुः ।
अवीचिवासिनो ये तु व्यपेताचरिणः सदा ।। ९
गच्छेत् सम्यगविज्ञाय बलं क्रोधस्य यो नृपः ।
वसेत् स नरके घोरे कल्पार्धं तु न संशयः ।। १०

अत्रेदं स्मरणीयं यत् राष्ट्ररक्षणे स्थितस्य राज्ञः के के गुणाः अपेक्षिताः तमुपजीव्य यथा अर्थशास्त्रे तथा धर्मशास्त्रेषु अतिविस्तृतानि आलोचनानि वर्त्तन्ते समासतस्तेषामत्र निर्देशः विधेयः ।

कौटिलीये अर्थशास्त्रे षष्ठेऽधिकरणे प्रकृतिसंपदः वृत्तान्तमुपजीव्य 'स्वाम्यामात्यजनपद-दुर्गकोशदण्डमित्राणि प्रकृतयः' (६।१।१) इत्युपक्रम्य—'तत्र स्वामिसंपत्' (६।१।२) इति कथनावसरे उल्लिखिताः वैशेषिकाः गुणाः यथा—'महाकुलिनो दैवबुद्धिसत्त्वसंपन्नो वृद्धदर्शी धार्मिकः सत्यवागविसंवादकः कृतज्ञः स्थूललक्षो महोत्साहोऽदीर्घसूत्रः शक्यसामन्तो दृढबुद्धिर-क्षुद्रपरिषत्को विनयकाम इत्याभिगामिकाः गुणाः। (६।१।३—These are qualities of one easily approachable)। अन्ये पुनः राज्ञः प्रज्ञागुणाः तत्रैवोपवर्णिताः यथा—'शुश्रूषाश्रवण-ग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिवेशाः प्रज्ञागुणाः ( ६।१।४ )। उत्साहगुणा स्तावत्—'शौर्य्यममर्षः शीघ्रता दाक्ष्यं'मिति ( ६।१।५ )। आत्मसंपत् इति कौटिल्येन विश्लिष्य निर्देशितं यथा—

वाग्मी प्रगल्भः स्मृतिमतिबलवानुदग्रः स्ववग्रहः कृतशिल्पोऽव्यसनो दण्डनाय्युपकारापकारयो र्दृष्टप्रतिकारी ह्रीमानापत्प्रकृत्योर्विनियोक्ता दीर्घदूरदर्शी देशकालपुरुषकारकार्यप्रधानः संधिविक्रमत्यागसंयमपणपरच्छिद्रविभागी संवृतोऽदीनाभिहास्यजिह्मभ्रुकुटीक्षणः कामक्रोध-लोभस्तम्भचापलोपतापपैशुन्यहीनः शक्लः स्मितोदग्राभिभाषी वृद्धोपदेशाचार इत्यात्म-संपत्। ( ६।१।६ )।

अनेनैव क्रमेण जनपदसंपत् (६।१।८), कोशसंपत् (६।१।१०), दण्डसंपत् (६।१।११)। मित्रसंपत् ( ६।१।१२ ) इत्यभिधाय—श्लोकचतुष्टयमुपन्यस्तं कौटिल्येन—

अरिवर्जाः प्रकृतयः सप्तैताः स्वगुणोदयाः।
उक्ताः प्रत्यङ्गभूतास्ताः प्रकृता राजसंपदः॥ ६।१।१५

संपादयत्यसंपन्नाः प्रकृतीरात्मवान्नृपः।
विवृद्धाश्चानुरक्ताश्च प्रकृती र्हन्त्यनात्मवान्॥ ६।१।१६

ततः स दुष्टप्रकृतिश्चातुरन्तोऽप्यनात्मवान्।
हन्यते वा प्रकृतिभि र्याति वा द्विषतां वशम्॥ ६।१।१७

आत्मवांस्त्वल्पदेशोऽपि युक्तः प्रकृतिसंपदा।
नयज्ञः पृथिवीं कृत्स्नां जयत्येव न हीयते॥ ६।१।१८

भगवान् मनुरपि तद्ग्रन्थस्य सप्तमेऽध्याये—

एवं वृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः।
विस्तीर्य्यते यशो लोके तैलबिन्दुरिवाम्भसि॥ ७।३३

अतस्तु विपरीतस्य नृपतेरजितात्मनः।
संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि॥ ७।३४

इत्युपक्रम्य बहुधा आलोचयामास। दिङ्मात्रं ततः निवेद्यते। तथाहि दण्डप्रणयनोपयोगित्व-प्रकरणे ( ७।१५-२४ ) साधुप्रयोगकर्त्तुः प्रशंसा—

यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा।
प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति॥ ( ७।२५ )

अन्यदपि मनूक्तं द्रष्टव्यम् ( ७.२६.४४ ) । याज्ञवल्क्येनापि राजगुणाः समासतः प्रकीर्तिताः ('महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः' ; इत्यारभ्य 'विनीत स्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः' ( १।३०९-३११ ) इत्यन्तं यावत् । सुस्पष्टं टीकाकृता विज्ञानेश्वरेण एते याज्ञोवल्क्योक्ताः राजगुणाः राजधर्माः वा अन्तरङ्गधर्मत्वेनाकलिताः । तत्र मन्त्रि-पुरोहितादीनां नियोगादयश्च यथागुणं बहिरङ्गत्वेन परिगणिताः । तथाहि—'स मन्त्रिणः प्रकुर्वीत प्राज्ञान् मौलान् स्थिरान् शुचीन्' ( या. १।३१२ ) इति याज्ञवल्क्यीयस्य निर्देशस्य व्याख्यानावसरे उल्लिखितं परिचायकत्वेन—'एवमभिषेकयुक्तस्यान्तरङ्गधर्मानभिधायेदानीं बहिरङ्गानाह' ।

नारदस्मृतौ 'प्रकीर्णके प्रकरणे ( पृः २६-२७ ; श्लोः १-५ ) राज्ञां कर्त्तव्यान्युपक्रम्य निर्देशितमनेकशः । तेषां तेषु तेषु क्षेत्रेषु विश्लेषणं भविष्यति । अन्यत् किञ्चिदत्र समासेन निवेद्यते । प्रजारक्षणात्मकं कर्म नृपाणां मुख्यमेवेत्यावेदितं प्राक् । सा रक्षा कथङ्कारं भवेदिति प्रपञ्चितं याज्ञवल्क्येन, तथा बृहस्पतिना ।

चाटतस्करदुर्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः ।। ( या. १।३३६ )

अत्र टीकायां मिताक्षरकृतायां द्रष्टव्यम्—'कायस्था लेखका गणकाश्च, तै पीड्यमाना विशेषतो रक्षेत् ; तेषां राजवल्लभतयातिमायावितया च दुर्निवारत्वात् ।'

यथा—

तत् प्रजापालनं प्रोक्तं त्रिविधं न्यायवेदिभिः ।
परचक्राच्चौरभयाद्बलिनोऽन्यायवर्तिनः ।। (बृ. १।३९ )

परानीकस्तेनभयमुपायैः शमयेन्नृपः ।
बलवत् परिभूतानां प्रत्यहं न्यायदर्शनैः ।। ( बृ. १।४० )

भगवता मनुना इदं कर्म सत्रस्वरूपत्वेन परिकल्पितम् । तथाहि मानवधर्मशास्त्रस्य अष्टमे अध्याये व्यवहारात्मके प्रतिपादितं तेन—

अभयस्य हि यो दाता स पूज्यः सततं नृपः ।
सत्रं हि वर्धते तस्य सदैवाभयदक्षिणम् ।। ८।३०३

स्पष्टतरमुद्घोषितं मनुना तत्रैव—

रक्षन् धर्मेण भूतानि राजा वध्यांश्च घातयन् ।
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ।। ८।३०६

[ व्यवहार-कल्पतरौ इदं वचनं बार्हस्पत्यमिति उल्लिखितम् ; पृः २६ ]

पुनश्च

सर्वतो धर्मषड्भागो राजा भवति रक्षतः ।
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः ।। ८।३०४

अनुरूपं बृहस्पतिस्मृतौ—

यदधीते यद्यजते यज्जुहोति यदर्चति ।
तस्य षड्भागभाग्राजा सम्यग् भवति रक्षणात् ।। ( १।४१ )

अत्रिवचनमप्यत्र प्रमाणरूपेण ग्राह्यं यथा—

दुष्टस्य दण्डः सुजनस्य पूजा न्यायेन कोशस्य च संप्रवृद्धिः ।
अपक्षपातोऽर्थिषु राष्ट्ररक्षा पञ्चैव यज्ञाः कथिता नृपाणाम् ।। (अत्रिस्मृतिः, २८)

विष्णुधर्मोत्तरपुराणेऽपि राष्ट्ररक्षणं तथा व्यवहारे यथायथदर्शनं यज्ञकल्पत्वेन प्रदर्शितं यथा सङ्केतरूपेण मनुनादौ दत्तं यथा—

दुष्टदण्डः सतां पूजा धर्मेण च धनार्जनम् ।
राष्ट्ररक्षा समत्वञ्च व्यवहारेषु पञ्चकम् ।।
भूमिपानां महायज्ञाः सर्वकल्मषनाशनाः ।। (३।३२३।२५-२६ )

प्रजापालनफलत्वेन पुण्यार्जनं नृपतेः प्रतिपादितं याज्ञवल्क्येन यथा—

पुण्यात् षड्भागमादत्ते न्यायेन परिपालयन् ।
सर्वदानाधिकं यस्मात् प्रजानां परिपालनम् ।। १।३३५

सम्यग्रक्षणाभावे प्रजानां पापादिकं नृपतौ अपि संक्रामितं भवेदित्यपि भाषितं याज्ञवल्क्येन—

अरक्ष्यमाणा कुर्वन्ति यत् किञ्चित् किल्विषं प्रजाः ।
तस्मात्तु नृपतेरर्धं यस्मात् गृह्णात्यसौ करान् ।। (१।७३७)

अन्यदपि दृढीकरणार्थं तत्रैवोपन्यस्तं याज्ञवल्क्येन—

प्रजापीड़नसंतापात् समुद्भूतो हुताशनः ।
राज्ञः कुलं श्रियं प्राणांश्चादग्ध्वा न निवर्त्तते ।। ( १।३४१ )

मानवीयानि वचनानि स्मर्त्तव्यान्यत्र—

योऽरक्षन् बलिमादत्ते करं शुल्कं च पार्थिवः ।
प्रतिभागं च दण्डं च स सद्यो नरकं व्रजेत् ।। ( ८।३०७ )
अरक्षितारं राजानं बलिषड्भागहारिणम् ।
तमाहुः सर्वलोकस्य समग्रमलहारकम् ।। ( ८।३०८ )

राष्ट्ररक्षणस्य अन्यतममुद्देश्यं तावद्भवेत् प्राजानां स्वेषु स्वेषु शास्त्रविहितेषु कर्मसु अभिनिवेशः इति । तद्राज्ञा सर्वथा यथा अविचलितं भवेत्तथा द्रष्टव्यमिति कौटिल्येन अर्थशास्त्रे तथा धर्मशास्त्रादिष्वपि प्रपञ्चितम् । तथाहि कौटिल्यः अर्थशास्त्रस्य विनयाधिकारे निर्दिशति यद्राजा पश्येद्यथा प्रजाः मर्य्यादां नातिक्रमेयुरिति—तदुक्तमादौ प्राजानां सर्वासां धर्मः यथा—

सर्वेषामहिंसा सत्यं शौचमनसूयानृशंस्यं क्षमा च । (अ. १.३.१३) ।

याज्ञवल्क्यस्मृतावपि अस्यैवार्थस्य प्रतिध्वननमालोक्यते । तदुक्तं तेन धर्मशास्त्रकृता—

इति सञ्चिन्त्य नृपतिः क्रतुतुल्यं फलं पृथक् ।
व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहम् ॥ (१।३६०)
कुलानि जातीः श्रेणीश्च गणान् जानपदानपि ।
स्वधर्माच्चलितान् राजा विनीय स्थापयेत् पथि ॥ (१।३६१)

नारदपादेनापि प्रकीर्णके उद्घोषितमनुरूपं यथा—

यो यो वर्णोऽपहीयेत यो य उद्रेकमाप्नुयात् ।
तं तं दृष्ट्वा स्वतो मार्गात् प्रयुक्तं स्थापयेत् पथि ॥ (प्रः, ६)

द्रष्टव्यमत्र अन्यदपि नारदवचनं—

यदि राजा न सर्वेषां वर्णानां दण्डधारणम् ।
कुर्यात् पथो व्यपेतानां विनश्येयुरिमाः प्रजाः ॥ (नाः, प्र, १४)

स्मरणीयमत्र यत् पञ्चरूपोपेतानां नृपाणां वैवस्वतं रूपं व्यवहारदर्शनादेव भवति इति नारदः दर्शयति—

धर्मासनगतः श्रीमान् दण्डं धत्ते यदा नृपः ।
समः सर्वेषु भूतेषु तदा वैवस्वतः स्मृतः ॥ (प्रः, ३०)

अत्र नारदीयवचनान्तराणि स्मर्त्तव्यानि—

पञ्च रूपाणि राजानो धारयन्त्यमितौजसः ।
अग्नेरिन्द्रस्य सोमस्य यमस्य धनदस्य च ॥ (प्रः. २६)

इत्यारभ्यः,......'अनुगृह्णाति दानेन तदा स धनदः स्मृतः' । (प्रः. ३१) इत्यन्तं यावत् ।

अखिलमिदं पर्य्यालोच्य इदमेव व्यवस्थापयितुं शक्यते यत् व्यवहारदर्शनं मुख्यत एव राजानमाश्रित्य सार्थकत्वं भजते । सत्यासत्यतत्त्वनिर्णये साक्षिणामुपयोगित्वमविसंवादितमिति कृत्वा व्यवहारः साक्षिन अपि व्याप्नोति ।

यदा कार्य्यवशात् राजा व्यवहारदर्शने आत्मानं यथायथं नियोजयितुं नार्हतीति कृत्वा, तत्त्वनिर्णये एकाकिना कृतस्य दोषबाहुल्यमपि भवितुमर्हतीति विचिन्त्य,

'सहायसाध्यं राजत्वं चक्रमेकं न वर्तते ।
कुर्वीत सचिवां स्तस्मात्तेषां च श्रृणुयान्मतम् ॥

इत्यर्थशास्त्रोक्तमपि (१.७.६) अनुस्मृत्य, ब्राह्मणान् सभ्यान् कार्य्यदर्शने नियोजयति, पितामहवचनमत्र प्रमाणं—'तस्मान्न वाच्यमेकेन विधिज्ञेनापि धर्मतः' ( **सरस्वतीविलासे,** पृः ६७, उत्कलितम्) इति । **शुक्रनीतिसारेऽपि—**

'नैकः पश्येच्च् कार्य्याणि वादिनोः श्रृणुयाद्वचः ।
रहसि च नृपः प्राज्ञः सभ्याश्चैव कदाचन ॥
पक्षपाताधिरोपस्य कारणानि च पञ्च वै ।
रागलोभभयद्वेषा वादिनोश्च रहःश्रुतिः ॥ (IV.5.6-7)

कात्यायनोऽस्मिन् विषये विशेषमाह—

यदा कुर्य्यान्न नृपतिः स्वयं कार्य्यविनिर्णयम् ।
तदा तत्र नियुञ्जीत ब्राह्मणं शास्त्रपारगम् ।। (का, ६३)
एकशास्त्रमधीयानो न विद्यात् कार्य्यनिश्चयम् ।
तस्माद्बह्वागमः कार्य्यो विवादेषूत्तमो नृपैः ।। (का, ६६)

मानवीयं वचनमत्र—

यदा स्वयं न कुर्य्यात्तु नृपतिः कार्य्यदर्शनम् ।
तदा नियुज्याद्विद्वांसं ब्राह्मणं कार्य्यदर्शने ।। (८।९)

'विद्वांस'मिति यदत्र निर्देशितं तत्र मेधातिथिव्याख्या द्रष्टव्या यथा—'विद्वत्ता च या व्यवहारविषया तदधिकारत एवार्यगृहीता । न हि यो यत्र जानाति स तत्राधिकारमर्हति । धर्मशास्त्रपरिज्ञानन्तु रागद्वेपदोपेण विपरीतार्थावधारणनिवृत्त्यर्थमुपयुज्यते । धर्मज्ञस्तु सतोरपि रागद्वेषयोः शास्त्रभयेन न विपर्येति इत्युपयोगवद्धर्मशास्त्रपरिज्ञानम् । व्यवहार-दर्शनं तु तदर्थगृहीतम् । येन विना न शक्यते व्यवहारनिर्णयः कर्त्तुं तद्विज्ञानं तदधिकाराक्षिप्तम् । यत्तु ज्ञात्वान्यथा क्रियते तन्निवृत्तिरुपदेशान्तरविषया । वक्ष्यति चैवमर्थं यत्नान्तरमपि 'वेदविदस्त्रयः', राजश्च प्रकृतो विद्वानि'ति । शास्त्रान्तरपरिज्ञानन्तु व्यवहारेऽधिक्रियमाणस्यादृष्टाय स्यात्' । इति ।

मनुना पुनरपि निर्देशितं यत्—

सोऽस्य कार्य्याणि संपश्येत् सभ्यैरेव त्रिभि वृतः ।
सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा ।। ८।१०

अत्रापि मेधातिथिपादेन यद्विश्लेषितं 'सभ्यैरि'ति पदमाश्रित्य तदुल्लेखमर्हति । तदुक्तम्—'सभ्यैरिति जातिविशेषानुपादानेऽप्युत्तरत्र विप्रग्रहणात् विप्रैः सहेति च पूर्वत्र ब्राह्मणग्रहणात् ब्राह्मणा एव विज्ञायन्ते' ।

प्रसङ्गतः भगवता मनुना 'सभा' पदस्य यद्व्याख्यानं विहितं तदतिवैशिष्ट्योपेततया उल्लेख्यं यथा—

यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः ।
राज्ञश्चाधिकृतो विद्वान् ब्रह्मण स्तां सभां विदुः ।। (८।११)

ऋग्वेदे (१.९१.२०)'सभेय'-पुत्रस्य दातृत्वेन सोमस्य उल्लेखः(…सोमो वीरं कर्मण्यं ददाति । सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै)। पुन स्तत्रैव (२.२४.१३)'सभेय' इति पदस्य प्रयोगः (सभेयो विप्रो भरते मती-धना) । सायणकृतं व्याख्यानमस्य पदस्य—सभेयः सभायां साधुः) । ऋग्वेदे अक्षसूक्ते 'सभा'शब्दस्य यः प्रयोगः स एव सभासामान्येऽर्थे यथा—'सभामेति कितवः पृच्छमानो…'१०.३४-६) वाजसनेयिसंहितायां (३०.६) 'सभाचर' इति पदस्य यः प्रयोगः तस्य 'सभासद्' इत्यर्थः ज्ञेयः । तत्र (१६.२४) 'सभा', 'सभापतिः' इति उभयोः पदयोः प्रयोगः । अथर्ववेदे (७.१२.१) 'सभा', 'समितिः' इति प्रजापतेः कन्याद्वयरूपेण वर्णिते । द्रष्टव्यं तत्र—१५.९.२ । तैत्तिरीयब्राह्मणे (३.७.४) 'सभापाल' इति यः प्रयोगः तस्य सायणकृतोऽर्थः 'कितवक्रीड़ास्थानम्' ।

यथा तथा भवतु, व्यवहारप्रकरणे सभापदं विशिष्टार्थकं यत्र विचारदर्शनं सम्भवति। तत्र सभायां ये राज्ञां सहायकत्वेन विचारकर्मणि नियोजिताः ते सभ्यपदवाच्याः भवन्ति इति तात्पर्य्यमवधेयम्।

एतदप्यत्र ज्ञेयं यद्बृहस्पतिना सभायाः प्रभेदाः परिकल्पिताः। यथा—

प्रतिष्ठिताऽप्रतिष्ठा च मुद्रिता शसिता तथा।
चतुर्विधा सभा प्रोक्ता, सभ्याश्चैव तथाविधाः॥ (१.५७)

तेषां व्याख्यानमपि वृहस्पतिना दर्शितम्, यथा—

प्रतिष्ठिता पुरे ग्रामे चला नामाप्रतिष्ठिता।
मुद्रिताऽध्यक्षसंयुक्ता राजयुक्ता च शासिता॥ (१.५८)

(इदं तु अपरार्कटीकायां वृहस्पतिमतत्वेनोल्लिखितम्। पृ: ६००)
यस्यामेवम्विधायां सभायां साधु विचारः प्रवर्त्तते सा सभा अध्वरसदृशीत्यपि भणितं वृहस्पतिना—

न्यायान् पश्येत् कृतमतिः सा सभाध्वरसम्मिता (१.५६)

अन्यदपि अभिहितम् तेन—

एतद्दशाङ्गकरणं यस्यामध्यास्य पार्थिवः।
न्यायं पश्येत् कृतमतिः या सभाऽध्वरसंमिता॥ (१.८३)

स्मरणीयमत्र यदुक्तमधिकं वृहस्पतिना—

पश्वाज्यऋत्विगादीनां संयोगाज्जायतेऽध्वरः।
यथा सम्बध्यते तेन व्यवहार स्तथोच्यते॥ (बृः, १.५५)

प्रपञ्चितं विशेषेण—

एषां मूर्धा नृपोऽङ्गानां मुखं चाधिकृतः स्मृतः।
बाहू सभ्याः स्मृति र्हस्तौ जङ्घे गणकलेखकौ॥
हेमाग्न्यम्बुदृशौ हृच्च पादौ स्वपुरुष स्तथा॥ (१.८४-८५)

सभायाः निवेशनप्रकारश्च वृहस्पतिः निर्दिशति, समासतः यथा—

औदकं पार्वतं वार्क्ष्यमैरणं धान्वनं तथा।
दुर्गमध्ये गृहं कुर्य्याज्जलवृक्षावृतं पृथक्॥ १.४५
प्राग्दिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत् सभाम्।
माल्यधूपासनोपेतां बीजरत्नसमन्विताम्॥ १.४६
प्रतिमालेख्यदेवैश्च युक्तामग्न्यम्बुना तथा।
लक्षण्यां वास्तुशास्त्रोक्तलक्षणेन तु लक्षिताम्॥ १.४७
भद्रासनमधिष्ठाय संवीताङ्गः समाहितः।
प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत्॥ १.४८.

* * * * १.४६-५५

प्राड्विवाकसदस्यानामुपजीव्य मतानि तु ।
तद्युक्तियोगाद्योर्थेषु निर्णये न स दण्डभाक् ।। १।५६

अपरार्कधृतं **बार्हस्पत्यमन्यदपि** वचनं सभाविषयकं द्रष्टव्यं यथा—

लोकवेदाङ्गधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा ।
यत्रोपविष्टा विप्राग्र्याः सा यज्ञसदृशी सभा ।।
(अपरार्कटीका, पृः, ६००; बृहस्पतिस्मृतिः, १.५६)

यदुक्तं सभाप्रसङ्गे **दशाङ्गं करणमिति** (१.८३) तद्व्याख्यायां पुनः बृहस्पतिः—

नृपोऽधिकृतसभ्याश्च स्मृतिर्गणकलेखकौ ।
हेमाग्न्यम्बुस्वपुरुषाः साधनाङ्गानि वै दश ।। १।८७
दशानामपि चैतेषां कर्म प्रोक्तं पृथक् पृथक् ।
वक्ताध्यक्षो, नृपः शास्ता, सभ्यः कार्य्यपरीक्षकः ।। १।८८
स्मृति विनिर्णयं ब्रूते जयदानं दमं तथा ।
शपथार्थे हिरण्याग्नी अम्बु तृषितजन्तुषु ।। १।८९
गणको गणयेदर्थं लिखेन्न्यायं च लेखकः ।
प्रत्यर्थिसभ्यानयनं साक्षिणं च स्वपूरुषः ।। १।९०
(कुर्य्यादालग्नकौ* रक्षेदर्थिप्रत्यर्थिनौ सदा । * आलग्नकौ प्रतिभुतौ इत्यर्थः)
एतद्दशाङ्गकरणं (यस्यामध्यास्य पार्थिवः ।। १।८३।
न्यायं पश्येत् कृतमतिः सा सभाध्वरसंमिता ।)
( अपरार्कटीकायां पृः ६००, बृह. स्मृतिः, १।८७-९० ; १।८३ ) ।

इयं नाम सभा यत्र व्यवहारदर्शनं भवति, तस्य सांज्ञान्तरं भवति '**धर्मासनमिति**'। प्रमाणं तत्र भगवान् मनुर्यथा—

**धर्मासन**मधिष्ठाय संवीताङ्गः समाहितः ।
प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत् ।। ८।२३

मेधातिथिना भाष्यकृता यदत्र भाषितं तत् तात्पर्यावहमेव । तदुक्तं तेन 'धर्मः प्रधानो यस्मिन्नासने भवति तद्धर्मासनम् । राजासने हि राजस्थित्यानुगुण्येनार्थमेव प्रधानीकरोति, न्यक्कृत्यापि धर्मम् । व्यवहारनिर्णये तु धर्ममेव प्रधानं श्रेयः आश्रयेत् इत्यर्थः' ।

कात्यायनेन पुनरिदं 'धर्माधिकरण'मिति संज्ञितम्—

धर्मशास्त्रविचारेण मूलसारविवेचनम् ।
यत्राधिक्रियते स्थाने धर्माधिकरणं हि तत् ।। ( श्लो. ५२)

सभा पुन मुंख्यं व्यवहारदर्शनस्थानं यद्यपि तथापि अन्यान्यमुख्यानि व्यवहारदर्शनस्थानानि भवितुमर्हन्तीति मन्ये **स्मृतिचन्द्रिका**मनुस्मृत्य वीरमित्रोदय-व्यवहारप्रकाशकृता उल्लिखितं, यथा—

दश स्थानानि वादानां पञ्च चैवाब्रवीद् भृगुः ।
निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः ।।

आरण्यास्तु स्वकैः कुर्युः सार्थिकाः सार्थिकै स्तथा ।
सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिभिः ।।
उभयानुमतं चैव गृह्यते स्थानमीप्सितम् ।
कुलिकाः सार्थमुख्याश्च पुरग्रामनिवासिनः ।।
ग्रामपौरगणश्रेण्यश्चातुर्विद्यश्च वर्गिणः ।
कुलानि कुलिकाश्चैव नियुक्ता नृपति स्तथा ।। इति (पृ: ८-९)

विषयेऽस्मिन् प्रागुल्लिखितं 'कुलानि श्रेणयश्चैव' (३।७) इत्यादिकं **नारद-वचनं** तथा **कात्यायनीयमनुरूपं** वचनम् ( श्लोक ८२, व्यवहारमाधवे उल्लिखितं ; पृ: २८०) इति विशेषतोऽवधेयम् ।

स्मृतिचन्द्रिकायां विश्लिष्य व्याख्यातं यत्—'एवमेते श्रेष्ठनिर्णयस्थाने मन्वादिभिरुक्ते । भृगुणा तु जघन्यान्यन्यापि निर्णयस्थानान्युक्तानि—

'आरण्यास्तु······नृपतिस्तथा' । इति—अत्राद्यानि पञ्च स्थानान्यारण्यादिजन-विशेषाणामेव । ग्रामाकारेणावस्थिते जनविवादे समीपवासिभिः निर्णयः । अर्थिप्रर्थिनो-रननुशयानुमतास्थानकुलिकसार्थमुख्यपुरग्रामवासिनो गृह्यते । ग्रामादीनि दश स्थानानि साधारणानि । (**स्मृतिचन्द्रिका**, व्यवहारकाण्डे, पृ: ३९-४० ) ।

मनुनोक्तं यत् कार्य्यान्तराकुलतया राजा—'तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्य्यदर्शने ।' ( ८।९ ) । सङ्केतितमिदं प्रागेव । मेधातिथिना तु मन्ये तत्र तद्विधस्य ब्राह्मणस्य गुणाः निर्देशिताः एकेन श्लोकेन यथा—

'अष्टादशपदाभिज्ञं प्राग्विवाकेतिसंज्ञितम् ।
आन्वीक्षिक्यां च कुशलं श्रुतिस्मृतिपरायणम् ।।'

स च ब्राह्मणः । 'कार्य्याणि संपश्येत् सभ्यैरेव त्रिभि र्वृतः ।' ( ८।१० ) इति मानवीयः पुनर्निर्देशः । मेधातिथिव्याख्याने सभ्याः ब्राह्मणा एव भवेयुरिति स्पष्टम् । तदुक्तम्—'सभ्यैरिति जातिविशेषानुपादानेऽप्युत्तरत्र विप्रग्रहणाद्ब्राह्मणैः सहेति च पूर्वत्र ब्राह्मणग्रहणात् ब्राह्मणा एव विज्ञायन्ते । त्रिग्रहणं त्वेकद्वयोः प्रतिषेधार्थम् । त्रिप्रभृतयस्त्विष्यन्त एव ।' इति ।

याज्ञवल्क्योऽपि मनुमनुस्मृत्य अनुरूपं निर्दिशति—

अपश्यता कार्य्यवशाद्व्यवहारान्नृपेण तु ।
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ।। ( २।३ )

अत्र विश्वरूपकृत-**बालक्रीड़ाभिध** व्याख्याने वैशिष्ट्यं किमपि न वर्त्तते इति कृत्वा मिताक्षराकृतं वैशिष्ट्यं किञ्चिल्लिख्यते । **सर्वधर्मविदिति** यद्विशेषणमत्र याज्ञवल्कीये श्लोके तत्र **विज्ञानेश्वरः**—'सर्वान् धर्मशास्त्रोक्तान् सामयिकांश्च धर्मान् वेत्ति विचारयतीति सर्वधर्मवित् ब्राह्मणो न क्षत्रियादि नियोज्यो व्यवहारदर्शने ।

कात्यायनमतेऽपि ब्राह्मणानामादौ नियोगः व्यवहारनिर्णये । तदुक्तम्—

यदा कुर्य्यान्न नृपतिः स्वयं कार्य्यविनिर्णयम् ।
तदा तत्र नियुञ्जीत ब्राह्मणं शास्त्रपारगम् ।। ( श्लो, ६३ )

तेषां गुणा अपि निर्देशिता: तेन—

दक्षं कुलीनमध्यस्थमनुद्वेगकरं स्थिरम् ।
परत्र भीरुं धर्मिष्टमुद्युक्तं क्रोधवर्जितम् ।। ( ३४ )
अक्रूरो मधुर: स्निग्ध: क्रमायातो विचक्षण: ।
उत्साहवानलुब्धश्च वादे योज्यो नृपेण तु ।। ( ६५ )
एकशास्त्रमधीयानो न विद्यात् कार्य्यनिश्चयम् ।
तस्माद्बह्वागमः कार्यो विवादेषूत्तमो नृपैः ।। ( ६६ )

एवम्विधगुणोपेतस्य ब्राह्मणस्याभावे शूद्रं वर्जयित्वा क्षत्रियं वैश्यं वा नियुञ्जीत इति कात्यायनवचनादवगम्यते—

ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ।। (श्लो-६७)

मानवीयानुशासनमत्र शूद्रस्य वर्जने अधिकतरं दृढमित्यवगन्तव्यम् यथा—

जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ।
धर्मप्रवक्ता नृपते र्न तु शूद्रः कथंचन ।। ८।२०

अस्य श्लोकस्य व्याख्याने मेधातिथिपादेन विस्तरशः आलोचनं विहितं तत् तत्रैवानुसन्धेयम् । तत्र मतान्तरमपि उल्लिखितं तेन । ( भारुचिकृतं मनुशास्त्रविवरणमपि द्रष्टव्यमत्र ।) अर्थवादरूपेण भगवान् मनुः निर्दिशति—

यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनम् ।
तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः ।। ८।२१

अस्मिन् प्रकरणे व्यासस्य वचनमधिकृत्य काचित् विचारणा प्रवर्तितेति सा उल्लेखमर्हति । तथाहि व्यासवचनं शूद्रवर्जनात्मकं यथा—

द्विजान् विहाय यः पश्येत् कार्य्याणि वृषलैः सह ।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशं च नश्यति ।। इति—

( स्मृतिचन्द्रिकायामुल्लिखितं व्यवहारकाण्डे, पृ: ३८ ) । व्याख्यातञ्च देवणभट्टेन—'अत स्तद्दोषपरिहारायामात्यादिस्थानेऽपि शूद्रान् वर्जयेदित्यभिप्राय:' ( पृ: ३८ ) । व्यवहारप्रकाशे सर्वेषां मतमस्मिन् विषये एकीकृत्यालोचितम् यथा—'कल्पतर्वादिषु तु प्रकरणाद्व्यवहारदर्शन एव शूद्रवर्जकत्वेन लिखितम् । अयं च प्रतिषेधोऽदृष्टार्थ एव, राष्ट्रक्षोभादेरदृष्टद्वारकफलस्यैव सङ्कीर्त्तनात् । चण्डेश्वरेण तु शूद्रस्य धर्मज्ञानेऽपि वेदाविरोधप्रतिसंधानविरहात्तत्प्रतिसन्धानस्य च सम्यङ्निर्णयोपायत्वात् त्याग इति युक्तिरप्युक्ता' । (पृ: २५)

सभाविषयकानि तथ्यान्यन्यानि प्रकरणान्तरे वैशद्येन आलोचयिष्यन्ते ।

अयमत्र नारदीयस्य विचार्यस्य श्लोकस्य पिण्डितार्थ :—

व्यवहारस्य चतुर्व्यापित्वं सिद्धं भवेत् यतः व्यवहारः कर्त्तारं ( अभियोक्तारमभियुक्तञ्च ) साक्षित्वेन उपस्थापितं जनं विचारकत्वेन नियोजितान् सभ्यान् राजानञ्चाभिव्याप्य प्रवर्त्तते । स्मृतिचन्द्रिकायां देवणभट्टकृतायां व्याख्यानावसरे कथितं—

यथा तत्त्वान्वेषणे यथायथव्यवहारदर्शने पुण्यभाक्त्वं सर्वेषां तेषां त्रयाणां साक्षिणां सभ्यानां राज्ञश्च तथैव अदर्शने अन्यथा—

सम्यगसम्यक् दृष्टो धर्माधर्मफलत्वेन कर्त्रादीन् पादशो व्याप्नोतीत्यर्थः ।
(व्यवहाराकाण्डे, II, पृः २५) ।
अदर्शने च पापभागित्वमेवेति उद्घोषितं भगवता मनुना—

पादोऽधर्मस्य कर्त्तारं पादः साक्षिणमृच्छति ।
पादः सभासदः सर्वान् पादो राजानमृच्छति ।। (८।१८)

(अयमपि श्लोकः नारदस्मृतौ, उपलभ्यते, ३।१२ ।)

भारुचिकृता व्याख्या अस्य श्लोकस्य निर्देश्योऽत्र यथा—'यतो नैवमुपेक्षा कर्त्तव्या कर्त्ता साक्षिणो वा दोषेण सम्बध्यन्ते किमस्माकमुदासीनानां भविष्यतीति । असम्यग्व्यवहारदर्शने हि सर्वत्रैनो विभज्यते । यद्यपि चैनसोऽन्येन कृतस्य विभागो नास्ति दोषसम्बन्धार्थवादस्त्वनेन न्यायेन प्रदर्श्यते असम्यग्दर्शन-निवृत्त्यर्थम् ।'

प्रायेणेदं व्याख्यानं पुरतः मनसि निधाय मेधातिथिरपि तद्भाष्ये प्रपञ्चयति यथा—

'न चैषा मनीषा कर्त्तव्या 'अर्थिना प्रत्यर्थिना वान्यतरस्य भूम्याद्यपह्रियत स एव भूम्यपहारदोषभाग्भविष्यति । वयं तु तदकारिणः किमिति दोषवन्तः स्यामः'—यत स्तत्पापं —चतुर्धा विभज्यते । अर्थवादश्चायम् । न ह्यन्यकृतस्यैनसोऽन्यत्र गमनमस्ति । तेषामपि मिथ्यादर्शननिषेधातिक्रमादुत्पद्यते पापं मिथ्यालम्बनं, राज्ञः स्वयमपश्यतोऽप्यधिकृतराजस्थानीयादिदोषाद्दोषवत्त्वम् । यदि वा राजाधिकृतो मिथ्याचरितेन ज्ञापितः पराजितं दुष्टं न निगृह्णीते, न च पुनः सम्यक् निर्णयं करोति ततः सोऽपि पापभाक् भवति । अधिकृतोपलक्षणार्थं वा राजग्रहणम् । यदा राजा स्वयं मिथ्या पश्यति तदा दुष्यति । यदा राजस्थानीय स्तदा तस्य दोष इत्यर्थः ।'

कुल्लूकभट्टकृता टीका चात्रानुसन्धेया वैशद्यर्थम् । मानवीयः अपरोऽपि श्लोकः अत्रोदाह्रियते—

राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः ।
एनो गच्छति कर्त्तारं निन्दार्हो यत्र निन्द्यते ।। (८।१९)

(अयं श्लोकः नारदस्मृतौ अपि उपलभ्यते–३।१३ ) ।

---

धर्मस्यार्थस्य यशसो लोकपंक्तेः[१] स्तथैव च ।
चतुर्णां करणादेषां चतुष्कारीति चोच्यते[२] ।। १४

---

१. लोकसक्तेः, Smṛ. Can. p. 26 ; लोकपङ्क्तेः Vir. Vy-pr. p. 5 ; Aparārka, p. 398, Asahāya on 1.14.

२. चतुष्कारी प्रकीर्त्यते—Vulg and Smṛ. Can. p. 26 ; प्रकीर्त्तितः—N.M.S ; Aparāka.

---

Eng. Trans. : (*Vyavahāra*) is declared to be contributing to fourfold (results—*catuṣkārī*) since it effectuates the four, namely, *Dharma* (religious merit), gain, fame and faith (esteem and attachment).

**असहायभाष्यम्**—लोकपंक्ति र्जनानुरागः । शेषं प्रसिद्धम् । एतेषां चतुर्णामपि करणाच्च-तुष्कारीति । १४ ।

**भवस्वामिभाष्यम्**—धर्मादीनां चतुर्णां करणाच्चतुष्कारी । धर्मः सम्यग्दर्शनात् साध्व-साधूनां शिष्टपरिपालननिमित्तः । अर्थश्च पराजितदण्डदानात् । सम्यक्करणादलोभाच्च कीर्त्तिः । लोकपक्तिरनुरागः । अनुरागादपहृतमपि ददाति । परचक्रादिषु साहाय्यमपि करोति ।

**नारदस्मृतितत्त्वप्रकाशिका**—यथायथव्यवहारदर्शनाद्राज्ञः चतुर्धा लाभः सम्भवतीति व्यवहारस्य चतुष्कारित्वं यदत्र प्रतिपादितं तेन भङ्ग्या व्यवहारफलप्रदरूपत्वात् स्तुतिः तद्द्वारेण राज्ञः कर्त्तव्यता च सङ्केतिता । नारदस्मृतौ प्रसङ्गात् श्लोकान्तरं यदुद्घोषितं तदनुरूपमिति कृत्वात्र उल्लेखमर्हति यथा—

धर्मश्चार्थश्च कीर्तिश्च लोकपंक्तिरुपग्रहः ।
प्रजाभ्यो बहुमानं च स्वर्गे स्थानं च शाश्वतम् ।। ( १.३३ )

(नारदीय-मनुसंहितायां, १।२७) । अस्य व्याख्यानं तु पश्चात् पूर्णतया उपपादयिष्यते । नारदपादेन स्पष्टमेवोक्तं यद्राज्ञा धर्मसाधकत्वेन भवितव्यं सर्वथा । तदुक्तं,

तत्र शिष्टं छलं राजा मर्षयेद्धर्मसाधनः ।
भूतमेव प्रपद्येत धर्ममूला यतः श्रियः ।। ( १।३१ ; ना.म.सं, १।२५ )

अपरञ्च तत्रैवार्थवादरूपेण प्रतिपादितं यत् धर्ममेव प्रधानीकृत्य तदनुसारं व्यवहारदर्शनात् राज्ञः उक्तगुणास्पदत्वं सम्भवति च—

'धर्मेणोद्धरतो राज्ञो व्यवहारान् कृतात्मनः ।
संभवन्ति गुणाः सप्त सप्त वह्नेरिवार्चिषः।। (ना. १।३२; ना.म.सं, १।२६)

तेषु सप्तगुणेषु केवलं गुणाचतुष्टयानामुल्लेखः विहितोऽत्र श्लोके । नारदीय-श्लोकान्तरदृष्ट्या चतुष्कारित्वं सप्तकारित्वस्योपलक्षकत्वेन ग्रहणीयम् ।

तत्र प्रजारक्षणात्मक-व्यवहारदर्शनाद्राज्ञः धर्मप्राप्तिरिति पूर्वमेवालोचितं किञ्चित् । अधिकमिह पर्य्यालोच्यते यन्मनुना भगवता राज्ञः कर्त्तव्यं धर्मात्मकत्वेन प्रपञ्चितं तद्ग्रन्थस्य सप्तमे अध्याये राजधर्म-प्रकरणे 'राजधर्मान् प्रवक्ष्यामी'त्युपक्रम्य(७।१)। तत्राद्यं कर्तव्यमेव—'सर्वस्यास्य यथान्यायं कर्त्तव्यं परिरक्षणमि'त्यनुसारं (७।२) प्रजारक्षणम् । तच्च व्यवहार-दर्शनं विना न सम्भवति । स्मर्त्तव्यमत्र मनुवाक्यान्तरं—

स्वे स्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः ।
वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता ।। ( ७।३५ )

'अप्रमत्तश्च परिरक्षेदिमाः प्रजाः' ( ७।१४२ ) इत्यभिधाय मनुना पुनरपि स्पष्टतः निवेदितं यद्रक्षणात् तस्य धर्मेण सम्बन्धः स्यात् । तदुक्तं **मानवे धर्मशास्त्रे**—

क्षत्रियस्य परो धर्मः प्रजानामेव पालनम् ।
निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते ।। (७।१४४)

अनेनैव प्रकारेण इदमेव दर्शयितुं शक्यते यद्व्यवहारः धर्मप्रदः राज्ञामिति । मानवीय-मन्यद्वचनमपि प्रमाणत्वेनात्र ग्राह्यं यथा—

एवं सर्वानिमान् राजा व्यवहारान् समापयन् ।
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ।। (८।४२०)

अर्थशास्त्रेऽपि, 'राज्ञः स्वधर्मः स्वर्गाय प्रजा धर्मेण रक्षितुः' (३.१.४१) इति । व्यवहारः कथमर्थस्य प्रदायकः स्यादिति प्रश्ने कोषमाश्रित्य किञ्चिद्वक्तव्यमेव । तत्रार्थशास्त्रे कौटिल्यः युक्ततया प्रस्तौति—'कोशपूर्वाः सर्वारम्भाः । तस्मात् पूर्वं कोशमवेक्षेत' इति ( अर्थशास्त्रे, २.८.१-२ ) । स्मर्त्तव्यमत्र कौटिलीयं वाक्यं—'स्वाम्यामात्यजनपददुर्गकोश-दण्डमित्राणि प्रकृतयः' इति (६.१.१.) ।

स्वाम्यामात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा ।
सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ।। ( मनुः, ९।२९४), इति

मानवीये धर्मशास्त्रे । याज्ञवल्क्यस्मृतावपि—

स्वाम्यमात्या जनो दुर्गं कोशो दण्ड स्तथैव च ।
मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते ।। ( या, १।३५३ )

कोषवृद्धिः कथङ्कारं भवेदित्यपि अर्थशास्त्रे निगदितं यथा—'प्रचारसमृद्धिश्चरित्रानुग्रहश्चोर-निग्रहो युक्तप्रतिषेधः सस्यसंपत् पण्यबाहुल्यमुपसर्गमोक्षः परिहारक्षयो हिरण्योपायनमिति कोशवृद्धिः । ( अर्थशास्त्रे, २।८।३)

महाभारते शान्तिपर्वणि प्रायेणानुरूपं भाषितं व्यासदेवेन—

कोशश्च सततं रक्ष्यो यत्नमास्थाय राजभिः ।
कोशमूला हि राजानः कोशो वृद्धिकरो भवेत् ।। (शान्ति, ११९.१६)

इति । कामन्दकेऽपि—

कोशमूलो हि राजेति प्रवादः सार्वलौकिकः । (१३.३३)

व्यवहारदर्शनेनापि अर्थलाभः भवेद्राज्ञः इति नारदेन यदस्मिन् श्लोके भाषितं तस्यार्थ स्तावद्यथा इदानीन्तने काले विचारार्थमानीते अभियोगे व्यवहारदर्शनमूल्यं (आङ्गलभाषायां—Court fee इत्याख्यम्) प्रदीयते तथैवासीत् । प्रायेण धनादिमूलके व्यवहारे (civil suit) निर्णयानन्तरं दण्डात्मकं मूल्यं गृह्यते राज्ञा । अर्थशास्त्रे धर्मस्थीयाख्ये तृतीयेऽधिकरणे विस्तरशः दण्डपरिमाणानि प्रतिपादितानि । ते च दण्डविशेषाः ग्राह्याः राज्ञा । दिङ्मात्रं यथा—परोक्तदण्डः पञ्चबन्धः । स्वयंवादिदण्डो दशबन्धः । पुरुषभृतिरष्टांशः । पथिभक्तमर्घविशेषतः,—तदुभयं नियम्यो दद्यादिति । (अर्थशास्त्रे, ३।१।२०-२४) ।

धर्मशास्त्रेऽपि बाहुल्येन दण्डरूपेण राजदेयत्वेन प्रतिपादनं वर्त्तते । तथाहि द्रष्टव्यं विष्णुधर्मसूत्रम् (६।२०-२१) उत्तमर्णश्चेद्राजानमियात् तद्विभावितोऽधमर्णो राज्ञे धनदश-भागसंमितं दण्डं दद्यात्, प्राप्तार्थश्चोत्तमर्णो विंशतितममंशम्' इति ।

मानवीयानि वचनान्यनेकानि सन्ति यथा—

यो यावन्निह्नुवीतार्थं मिथ्या यावति वा वदेत् ।
तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम् ।। ८.५९

ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ।। ८।१३९

**याज्ञवल्क्य-**वचनान्यपि अत्रोदाहरणीयानि—

राज्ञाधमर्णिको दाप्यः साधिताद्दशकं शतम् ।
पञ्चकं च शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः ।। (२।४२)

(**मिताक्षरा** द्रष्टव्या—प्रतिपन्नस्य साधितार्थस्य दशममंशं राजाऽधमर्णिकाद्दण्डरूपेण गृह्णीयादित्यर्थः । साधितार्थस्य विंशतितमं भागमुत्तमर्णाद्राजा गृह्णीयादित्यर्थः ) ।

अन्यदपि यथा—

निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम् ।
मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत् ।। (२।११)

नारदस्मृतावपि— ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति ।
राज्ञा दापयितव्यः स्यान् गृहीत्वा पञ्चकं शतम् । (१।१३२)

अनेन रूपेण इदं तावत् सुप्रतीतं यद्व्यवहारदर्शनेन नृपस्य अर्थागमोऽपि सम्भवति ।

यथायथव्यवहारदर्शनात् यशोभागित्वं राज्ञां तु सुनिश्चितमेव ।

प्रजापालनादपि राज्ञां कररूपेणार्थलाभः सम्भवतीति तत्तत्प्रकरणे दर्शयिष्यामः । दिङ्मात्रं सङ्केतरूपेण द्रष्टव्यं **कात्यायन-**वचनम्—

भूस्वामी तु स्मृतो राजा नानाद्रव्यस्य सर्वदा ।
तत्फलस्य हि षड्भागं प्राप्नुयान्नान्यथैव तु ।। (श्लो, १६)

नारदस्मृतौ प्रकीर्णकेऽपि—

अन्यप्रकारादुचिताद्भूमेः षड्भागसंज्ञितात् ।
बलिः स तस्य विहितः **प्रजापालनवेतनम्** ।। (प्रः, ४८)

बार्हस्पत्यमपि वचनञ्चात्रानुकूलम्—

यदधीते यद्यजते यज्जुहोति यदर्चति ।
तस्य षड्भागभाग्राजा सम्यग् भवति रक्षणात् ।। (१।४१)

व्यवहारात्मकप्रजारक्षणात् कीर्त्तिर्यथा राज्ञां स्यात् तत्प्रतिषेधमुखेन विवृणोति भगवान् मनुः—

अधर्मदण्डनं लोके यशोघ्नं कीर्त्तिनाशनम् ।
अस्वर्ग्यं च परत्रापि तस्मात्तत् परिवर्जयेत् ।। (८।१२७)

**अन्यच्च,** अदण्ड्यान् दण्डयन् राजा दण्ड्यां श्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव गच्छति ।। (८।१२८; वृहस्पतिस्मृतिः, १।७७)

वृहस्पतिवचनमनुकूलमत्र—

तस्मान्न्यायेन राजा तु सम्यग्यत्नेन पालयेत् ।
तस्मादर्थं च राज्यञ्च (यशश्च) विपुलं लभेत् ।। (१।५३)

चतुष्करत्वं व्यवहारस्य यदुक्तं तत्रान्तिमा खलु लोकपङ्क्तिः, लोकपक्ति र्वा; यस्यार्थः देवणभट्टेन स्मृतिचन्द्रिकायां कृतः—लोकानुरागः, परन्तु तद्धृतः पाठः '**लोकसक्ति**'रिति। तदुक्तं स्मृतिचन्द्रिकायाम्—'लोकसक्तिः लोकानुरागः' (पृः २६)। अपरार्केण याज्ञवल्क्य-स्मृतिटीकायां 'लोकपङ्क्ति'रिति पाठे अर्थोऽनुरूपः दर्शितः—'लोकपङ्क्ति र्लोकानुरागः' इति। भवस्वामिकृतभाष्येऽपि 'लोकपक्ति'रिति पाठे अनुरागार्थत्वं स्पष्टम्। तदुक्तं 'लोकपक्तिरनुरागः'। तेनैव भवस्वामिना अनुरूपः यः श्लोकः वर्त्तते (१।२७), यत्र च '**लोकपक्ति**'रिति पदस्य उल्लेख; तत्र व्याख्यानं प्रदत्तं 'लोकपक्ति र्दुष्टनिग्रहात्' इति। विश्लेषितमत्र—अनुरागादपहृतमपि ददाति, परचक्रादिषु साहाय्यमपि करोति।

तस्मात् व्यवहारमार्गमाश्रित्य यथायथतत्त्वदर्शनात् दण्ड्यदण्डनात् दुष्टनिग्रहात्तथा शिष्टपालनाच्च राजनि जनानां विश्वासात्मकोऽनुरागः जायते एवेति सुप्रतीतमेव।

---

राजा सत्पुरुषः[१] सभ्याः शास्त्रं गणकलेखकौ।
हिरण्यमग्निरुदकमष्टाङ्गः समुदाहृतः॥[२] १५

---

१. सपुरुषः Bb, BL ; सुपुरुषः C ; पुरुषः Y ; स्वपुरुषः in Ap. on Yāj. II.1,
सपुरुषाः Sm. C. II.26, N.M.S.
स पुरुषः Vy. P. p. 6.
२. अष्टाङ्गः स उदाहृतः Vulg ; N.M.S.

---

Eng. Translation : *Vyavahāra* is stated to be comprised of eight constituents, (namely), the king, his honest (dutiful officer), the members of his Court, the (sacred) law-books (such as those of Manu, Nārada etc.) the accountant, the scribe, gold, fire and water.

**असहाय-कृत-भाष्यम्**—राजा राजपुरुषो दुष्टावकोटनार्थं तस्यानवसरे राजकीय-चक्षुर्भूतो राज्ञा नियुक्तः प्राड्विवाकः। पुरुषः स उभयात्मकः सभ्यश्च राजपुरुषश्च। तथा सभ्या उपरि वक्ष्यमाणलक्षणाः। तथा शास्त्रं मनुनारदविश्वरूपात्मकम्। सत्यासनं शतभेद-व्यवहारदण्डनियमसंदेहविच्छेदकारकम्।

तथा लेखकः स्थानप्रतिबद्धः। भाषोत्तरक्रियाजयपत्रादिलेखनोपयोगी। हिरण्य-मग्निरुदकमिति। एतान्यपि त्रीणि प्रत्यक्षदेवतास्वरूपाणि। इत्येतान्यष्टावप्यङ्गानि यदा सभायां सन्निहितानि भवन्ति। तथा दिव्यादिष्वपि धर्मः साक्षादेव तीर्थसत्यासत्ययो र्विभक्तिं परिस्फुटीकरोति। (अथाष्टादशपादमुच्यते तस्य सूत्रम्)॥ १५।

**भवस्वामि-भाष्यम्**—राजा सह पुरुषैः सपुरुषः अङ्गम्। तदधीनत्वात् पुरुषानयन-धारणादिषु व्याप्रियन्त पुरुषाः। सभ्याः युक्तिविचारशीलिनः। शास्त्रनुमानगम्येऽर्थे कर्तव्यता-प्रतिपादनेन। गणकः संख्याविषये। लेखकः पूर्वपक्षोत्तरपक्षाक्षरविन्यासे। हिरण्याग्न्युदकानि समयादौ। एवमष्टाङ्गः।॥ १५।

**स्मृतितत्त्वप्रकाशिका**—श्लोकेऽस्मिन् भङ्ग्या व्यवहारस्य अष्टाङ्गत्वं प्रतिपादितम्। इदमत्रावधेयं यद्गणनया श्लोकोक्तपदार्थानां नवत्वमेव यदायाति तथापि तत्राष्टविधत्वेन

य उल्लेखः विहितः स एव सुपुरुषोपेतस्य राज्ञः एकत्वग्रहणादिति समाधानरूपत्वेन बोध्यमन्यथा संख्यागतोऽयं विरोधः दुरपनेयः। वस्तुतस्तु पुरुषद्वारकमेव राज्ञः सर्वकर्मणि, विशेषतः व्यवहारदर्शनकर्मणि चेष्टादिकं भवेदिति तात्पर्य्यमनुसन्धेयम्।

अष्टाङ्गात्मकस्य व्यवहारस्य प्राधानाङ्गभूतः खलु राजा स एव तत्प्रतिनिधिभूतैः तन्नियोजितैः प्राड्विवाकादिभिः सह धर्मं पुरस्कृत्य व्यवहारमार्गे नियोजयात्यात्मानं उत्तमदर्शित्वात् पुण्यफलादिकं लभते च। तथा च वासिष्ठं वचनम्—

यत् पुण्यमुद्धृते विप्रे म्रियमाणे जलाशये।
तत् पुण्यं संशयारूढे व्यवहारसमुद्धृते॥

(उल्लिखितं व्यवहारनिर्णये, पृः, ८)

निश्चप्रचमेव यदेष्वङ्गेषु मुख्यः नाम राजा। प्रदर्शितमिदं बृहस्पतिना-

सर्वेषामधिको राजा धर्मं यत्नेन निश्चितम्॥
उत्तमाधममध्यानां विवादानां विचारणात्।
उपर्य्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः॥ इति (१।९५-९६)

सभ्याः खलु अष्टाङ्गानामन्यतमत्वेनाकलिताः। तेषां लक्षणानि तु उपरिष्टाद्वक्ष्यते। अस्मिन् एव प्रकरणे प्रागेवादितं सभाविषयकं यत् किञ्चित् तदितरमधिकमुपन्यस्यते। यन्मनुना भगवता सभामधिकृत्य प्रपञ्चितं (८.११) 'यस्मिन् देशे निषीदन्ती'त्यादिरूपेण, तदनुरूपमेव प्रायेण बार्हस्पत्यं वचनम्—

लोकवेदाङ्गधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा।
यत्रोपविष्टा विप्राग्र्याः सा यज्ञसदृशी सभा॥ (१।५९)

बृहस्पतिः स्वयं युक्त्या यज्ञसादृश्यं सभायाः प्रतिपादयति—

यज्ञे सम्पूज्यते विष्णुर्व्यवहारे महीपतिः।
जयी तु यजमानोऽत्र जितः पशुरुदाहृतः॥
पूर्वपक्षोत्तरावाद्यं प्रतिज्ञा तु हविः स्मृतः।
त्रयी शास्त्राणि सभ्यास्तु ऋत्विजो दक्षिणा दमः॥
तथा चैवोपदृष्टारौ ज्ञेयौ गणकलेखकौ।
एषोऽध्वरसमः प्रोक्तो व्यवहारः समाहृतः॥ (१।११८-१२०)

प्रासङ्गिकतया देवणभट्टेन स्मृतिचन्द्रिकायां (पृः ३३) यत् टिप्पनीरूपेण निवेदितं तदपि स्मर्त्तव्यमत्र यथा—'अत्र प्राड्विवाकादीनामर्थायितया ऋत्विग्वत्, सहायमात्रं नाधिकारः। अधिकारस्तु व्यवहारदर्शने राज्ञ एवेति मन्तव्यम्। अतएवात्र 'सप्राड्विवाक' (कात्यायनस्मृतिसारोद्धारे, श्लो, ५६) इत्यादिना तस्यैवाप्राधान्येन निर्देशो नेतरेषां, फलसम्बन्धोऽपि तस्यैवोक्तो न त्वन्येषाम्।

बृहस्पतिना अन्यदप्युक्तमस्मिन्नवसरे—

सत्यं देवाः समासेन मनुष्यास्त्वनृतं विदुः।
इहैव तस्य देवत्वं यस्य सत्ये स्थिता मतिः॥ (१।५४)

(मतमिदमुल्लिखितं वरदराजकृते **व्यवहारनिर्णये**, पृः ८)

बृहस्पतिः प्रतिष्ठिता-चला-मुद्रिता-शास्त्रिता-भेदेन सभायाः चातुर्विध्यं प्रतिपाद्य, तद्योगात् सभ्यानामपि तथाविधत्वं सलक्षणं प्रतिपादयतीति तेषामुल्लेखोऽत्र करणीयः यथा—

प्रतिष्ठिता चला ('अप्रतिष्ठिता इति पाठान्तरम्) चैव मुद्रिता शास्त्रिता तथा ।
(शासिता इति पाठान्तरम्)
चतुर्विधा सभा प्रोक्ता सभ्याश्चैव तथाविधाः ।। (१।५७)

(व्यवहारनिर्णये उल्लिखितमिदं मतम्—पृः ६, स्मृतिचन्द्रिकायामपि, Vy. II. पृः ४१) ।

तत्र प्रतिष्ठिता पुरे ग्रामे चला नामाप्रतिष्ठिता ।
मुद्रिताध्यक्षसंयुक्ता राजयुक्ता च शास्त्रिता ।। (१।५८)

स्मृतिचन्द्रिकायां ( पृः, ४१ ) बृहस्पत्युक्तस्य वचनस्य व्याख्या यथा—'आरण्यकादिस्थानत्रये या सभा सा अप्रतिष्ठिता, प्रायेण देशान्तरगमनयोग्यत्वादुभयवासिप्रभृतिषु दशसु स्थानेषु तदभावात् प्रतिष्ठिता । नियुक्तस्थाने पुनः मुद्राहस्ताध्यक्षसाहित्या (त्) मुद्रिता । नृपस्थाने तु शास्त्रनियन्तृकत्वाच्छास्त्रिता ।...'अध्यक्षसंयुक्ता' इति यदाह बृहस्पति स्तत्र—अध्यक्षः प्राड्विवाकः व्यवहारदर्शनेऽधिकृतत्वात् । तस्त च हस्ते राज्ञा स्वमुद्रा प्रतिवाद्यानयनार्थं देयेत्यत एवावगम्यते । तत्र प्रतिष्ठिता अप्रतिष्ठिता च सभा निर्णयार्थिभिरेव प्रार्थनार्थं दानमाननादिभि कार्य्या । शास्त्रप्रयुक्त्या नृपतिप्रयुक्त्यभावात् सभासिद्ध्यभावात् । मुद्रिता शास्त्रिता च स्वाधिकारवशाद्राज्ञैव क्रियते । तेन तत्र निर्णयार्थिनां तत्समीपगमनमेव न सभाकरणम् ।

सभाप्रकरणे नारदभाषितं यत्तदेव उत्तरत्र व्याख्याप्रसङ्गात् स्पष्टीभविष्यति । तदुक्तं तेन—

न सा सभा यत्र न सन्ति वृद्धाः
वृद्धा न ते ये न वदन्ति धर्मम् ।
नासौ धर्मो यत्र नो सत्यमस्ति
न तत् सत्यं यच्छलेनानुविद्धम् ।। (३।१८)

अनुरूपं व्यासवचनमुद्धृतपरार्ककृतटीकायाम् (पृः ६०४) ।

सभालक्षणात्मके तृतीयेऽध्याये नारदपादेन सभायाः तथा सभ्यानामाचरणादिकमुपजीव्य बाहुल्येन निर्देशितं तत्र विशेषतः, ३।४, ३।५, ३।७, ३।८, ३।११, ३।१५ श्लोकाः द्रष्टव्याः । व्याख्याप्रसङ्गात् पश्चात्तेषामालोचनं भवेदिति नात्र आलोच्यते ।

कात्यायनः सभ्यानां गुणान् करणीयादिकं, तथा सभ्यदोषात् नष्टस्य दण्डविधानादिकं (श्लोक ८१) विस्तरशः निर्दिशति (श्लोक ७१-८१) ।

याज्ञवल्क्यस्य सभ्यविषयकः निर्देश स्तावत् श्लोकत्रयेणोपनिबद्धः (२।२-४) । तत्र सामान्यतः—

श्रुताध्ययनसंपन्नाः धर्मज्ञाः सत्यवादिनः ।
राज्ञा सभासदः कार्य्या रिपौ मित्र च ये समाः ।। (या. २।२)

इति यदुक्तं, योगीश्वरेण, तद्व्याख्यायमधिकं संयोजितं मितक्षराटीकायां विज्ञानेश्वरेण ।

अत्र च शास्त्रितासभायां सभान्तरेभ्यः प्राबल्यमाह पितामहः—

पूर्वस्थानगता वादाः धर्मतोऽधर्मतोऽपि वा ।
नृपस्थानं समाश्रित्य पूर्ववादं भजन्ति ते ।। इति

पूर्ववादं पूर्वपक्षम् । नृपस्थानग्रहणं प्रबलस्थानोपलक्षणार्थम् । यतः स एवाह—

ग्रामे दृष्टः पुरं यायात् पुरे दृष्टस्तु राजनि ।
राज्ञा दृष्टः कुदृष्टो वा नास्ति तस्य पुनर्भवः ।।

(स्मृतिचन्द्रिका—व्य. का, पृ: ४१-४२)

"सप्राड् विवाकः सामात्यः सब्राह्मणपुरोहितः ।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः" ।। ( कात्या, श्लो, ५६ )

इति कात्यायनवचनोल्लेखद्वारेण प्रतिपादितं विज्ञानेश्वरेण यत् तत्र ब्राह्मणाः अनियुक्ताः, सभासदस्तु नियुक्ता इति भेदः । अतएवोक्तम् 'नियुक्तो वानियुक्तो वा धर्मज्ञो वक्तुमर्हति' इति । तत्र नियुक्तानां यथावस्थितार्थकथनेऽपि यदि राजा अन्यथा करोति तदासौ निवारणीयः । अन्यथा दोषः । तदुक्तं कात्यायनेन—

अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः ।
तेऽपि तद्भागिनस्तस्मात् बोधनीयः स तैं नृपः ।। ( का, ७५ ) इति ।

अनियुक्तानां पुनरन्यथाभिधानेऽनभिधाने वा दोषो न तु राज्ञोऽनिवारणे ।

याज्ञवल्क्यीये श्लोके (२।२), 'रिपौ मित्रे च ये समाः' इत्यस्य व्याख्याप्रसङ्गतः मिताक्षरायां कात्यायनीयं वचनमुद्धृत्य विश्लेषितं यत्—'रिपौ मित्रे च' इति चकाराल्लोकरञ्जनार्थं कतिपयैं र्वणिग्भिरप्यधिष्ठितं सदः कर्तव्यम्, यदाह कात्यायनः—

कुलशीलवयोवृत्तवित्तवद्भिरमत्सरैः ।
वणिग्भिः स्यात् कतिपयैः कुलभूतैरधिष्ठितम् ।। ( का. ५८ )

( कुलभूतै'रित्यस्यार्थः वृद्धैरिति व्यवहारप्रकाशे—पृः ३१ ) । अन्यदप्युक्तं तेन—

श्रोतारो वणिजस्तत्र कर्तव्याः कार्य्यदर्शिनः । ( का, ५९ )

पूर्वमेव सङ्केतितं यदपरार्ककृतटीकायां नारदवचने पाठः धृतः 'स्वपुरुषः' ( राजा स्वपुरुषः··· पृः ५९८, याः, २।१ श्लोकमाश्रित्य); तदाश्रित्य वक्तव्यं किञ्चिदुपस्थापनीयमत्र ।

बृहस्पतिना सभायाः दशाङ्गं करणं प्रदर्शितं, सर्वेषां तेषां कार्य्याणि उपयोगित्वं च प्रतिपादितमुल्लिखितं च प्रागेव ।

बृहस्पतिः गणकलेखकानां गुणान् निर्दिशति—

शब्दाभिधानतत्त्वज्ञौ गणनाकुशलौ शुची ।
नानालिपिज्ञौ कर्तव्यौ राज्ञा गणकलेखकौ ।। ( १।८१ )

एतदेव विशेषयति व्यासः—

त्रिस्कन्धज्योतिषाभिज्ञं स्फुटप्रत्ययकारकम् ।
श्रुताध्ययनसम्पन्नं गणकं कारयेन्नृपः ।।

स्फुटलेखं नियुञ्जीत शब्दलाक्षणिकं शुचिम् ।
स्फुटाक्षरं जितक्रोधमलुब्धं सत्यवादिनम् ।। (व्यवहारप्रकाशे उल्लिखितम् । पृ: ३२)

स्मृतिचन्द्रिकायां देवणभट्टेन पितामहकृतस्य अष्टाङ्गस्य करणस्य उल्लेखः एवं कृतः—

लेखको गणकश्शास्त्रं साध्यपालः सभासदः ।
हिरण्यमग्निरुदकमष्टाङ्गं करणं स्मृतम् ।। इति । (स्मृतिचन्द्रिका, पृ: ६०)

बृहस्पतिवचने 'एतत् करण'मित्यस्य व्याख्याने व्यवहारप्रकाशे प्रतिपादितम्—'सभारूपं शरीरं दशाङ्गमित्यर्थः । अन्यच्च तत्रैव व्याख्यातम्—'यस्यां शरीरतुल्यायां पार्थिवः क्षेत्रज्ञ इव 'अध्यास्य' अधिष्ठानं कृत्वा । अनेन क्षेत्रज्ञः शरीरमिव साङ्गां सभां राजाधिष्ठायान्तर्यामिवत् सर्वचरितानि पश्यंस्तदनुरूपस्य फलस्य भोक्ता दाता च भवतीति सूचितम्' (पृ: ३१) ।

स्वपूरुषस्य कार्य्यञ्च प्रत्यर्थिनः तथा साक्षिणां सभायामानयनं प्रतिभूपुरुषाणामभावे च अर्थिनः प्रत्यर्थिनश्च सभायां रक्षणविधानम् । बृहस्पतिः पुनरेव प्रतिपादयति यथा—

आकारणे रक्षणे च साक्ष्यर्थिप्रतिवादिनाम् ।
सभ्याधीनः सत्यवादी कर्तव्यस्तु स्वपूरुषः ।। ( बृः, १।८२ )

देवणभट्टः स्मृतिचन्द्रिकायां विवृणोति—'आकारणमाह्वानम् । स्वपूरुषः क्रमायातो यः स सभ्याधीनः कर्तव्यो राज्ञेत्यर्थः ।

अस्य स्वपूरुषस्य 'साध्यपाल' इति संज्ञा विहिता व्यासेन यथा—

साध्यपालस्तु कर्तव्यो राज्ञो साध्यस्य साधकः ।
क्रमायातो दृढः शूद्रः सभ्यानां च मते स्थितः ।।

'साध्यस्य'-इत्यस्य व्याख्यानं स्मृतिचन्द्रिकायां यथा—'साध्यस्यार्थिप्रत्यर्थिसाक्ष्यादीनामाह्वानकार्यस्येत्यर्थः । ( पृ: ३६ ) । स च शूद्र एवेत्यूहनीयम् ।

टिप्पणीरूपेण स्मृतिचन्द्रिकामनुसृत्य मित्रमिश्रेण संयोजितमत्रोल्लेख्यम्—

त्रिस्कन्धं होरागणितसंहिताख्यत्रिभेदयुक्तं यत् ज्योतिःशास्त्रं तद्वेदिनम् । श्रुताध्ययनसम्पन्नमित्युक्ते गणको द्विजातिस्तत्साहचर्य्याल्लेखकोऽपि । 'नृपः शास्ते'ति यदुक्तं तदर्थदण्डवधदण्डयो राजकर्तृकत्वनियमार्थम् । वाग्दण्डधिग्दण्डौ तु प्राड्विवाकेनापि कार्य्यौ । दण्डप्राप्तधने वध्यवधे च राज्ञ एवाधिकारात् । वाग्दण्डधिग्दण्डयोस्तु दमनमात्रार्थत्वादनियमः । तथा च 'वादनिर्णयकृद्राजा ब्राह्मणश्च बहुश्रुतः'—इत्यभिधायोक्तं तेनैव—

धिग्दण्डस्त्वथ वाग्दण्डो विप्रायत्तौ तु तौ स्मृतौ ।
अर्थदण्डवधावुक्तौ राजायत्तावुभावपि ।। इति ।

प्रतिष्ठिताप्रतिष्ठितसभास्थैस्तु सभ्यैः निर्णयमात्रं कृत्वोपरमितव्यम् । पूर्ववचनात् क्वचिदपि दण्डे तेषामनधिकारात् ।

सर्वरञ्जकः सभास्तारोऽपि व्यासेनोक्तः—

अर्थिप्रत्यर्थिनौ सभ्यां लेखप्रेक्षकांश्च यः ।
धर्मवाक्यैः रञ्जयति स सभास्तारतामियात् ।।

( व्यवहारप्रकाशे, पृः ३२ )

रूपकाश्रयेण बृहस्पतिः प्रतिपादयति—

एषां मूर्धा नृपोऽङ्गानां मुखं चाधिकृतः स्मृतः ।
बाहू सभ्याः, स्मृति र्हस्तौ जङ्घे गणकलेखकौ ।।
हेमाग्न्यम्बु दृशौ हृच्च पादौ स्वपूरुष स्तथा । ( १।८४-८५ )

नारदोक्ते श्लोके अङ्गानामन्यतमत्वेन यत् 'शास्त्र'मित्युल्लेखितं, तत्तु 'धर्मशास्त्र'मिति मुख्यत्वेन ज्ञेयम् । नारस्मृतौ अस्मिन्नेव प्रकरणे ३५ संख्यक-श्लोकऽभिहितं राजानमुद्दिश्य—

धर्मशास्त्रं पुरस्कृत्य प्राड् विवाकमते स्थितः ।
समाहितमतिः पश्येद्व्यवहारमनुक्रमात् ।। इति

यद्यप्यर्थशास्त्रस्याप्युल्लेख स्तत्र वर्त्तते नारदवचने—

धर्मशास्त्रार्थशास्त्राभ्यामविरोधेन यत्नतः ।
संपश्यमानो निपुणं व्यवहारगतिं नयेत् ।। इति ( १।१३७ ); तथापि तयो र्विप्रतिपत्तौ अर्थशास्त्रवर्ज्जने धर्मशास्त्रवरणे च नारदनिर्देशः ग्राह्यः, यथा—

यत्र विप्रतिपत्तिः स्याद्धर्मशास्त्रार्थशास्त्रयोः ।
अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेत् ।। ( १।३९ ) इति ।

याज्ञवल्क्यीयं वचनमप्यनुकूलमेव—

व्यवहारान् नृपः पश्येद्विद्वद्भिः ब्राह्मणैः सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ।। ( २।१ ) इति ।

अत्रेदं स्मर्त्तव्यं यत् यद्यपि भगवता मनुना 'धर्मशास्त्रं तु वै स्मृतिः' ( २।१० ) इत्यनेन धर्मशास्त्रस्य स्मृत्यर्थत्वं निगदितं तथापि अर्थविस्तृतिरस्य पदस्य तात्त्विकतया प्रतिपादितं **पितामहेन**—

वेदास्साङ्गास्तु चत्वारो मीमांसा स्मृतय स्तथा ।
एतानि धर्मशास्त्राणि पुराणं न्यायदर्शनम् ।। इति

( **स्मृतिचन्द्रिकायामुद्धृतम्**—पृः ५४ )

स्मर्त्तव्यश्चास्मिन् विषये याज्ञवल्क्योक्तः—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।। ( १.३ ) इति ।

श्लोकमिममाश्रित्य विश्वरूपकृता बालक्रीड़ान्युसन्धेया । प्रासङ्गिकतया च राष्ट्ररक्षणात्मकं शास्त्रं यत् कौटिलीयमर्थशास्त्रं तत्र धर्मस्थीयात्मके तृतीयाधिकरणे व्यवहारस्थापनायां यदुक्तं तन्निर्देश्यमत्र—

संस्था या धर्मशास्त्रेण शास्त्रं वा व्यावहारिकम् ।
यस्मिन्नर्थे विरुध्येत धर्मेणार्थं विनिर्णयेत् ।।

शास्त्रं विप्रतिपद्येत धर्मे न्यायेन केनचित् ।
न्याय स्तत्र प्रमाणं स्यात्तत्र पाठो हि नश्यति ।। (३।१।४४-४५)

तत् सिद्धं यदत्र शास्त्र-पदेन वेदाविरोधिनः मुख्यतः धर्मशास्त्रस्य ग्रहणं बोध्यम् । तत्रापि के तावत् धर्मशास्त्रकर्त्तारः इत्याकाङ्क्षायां याज्ञवल्क्योक्तं वचनमनुधावनीयं यथा—

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती ।। १।४
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ।। १।५

(बालक्रीड़ोपेता या नाम याज्ञवल्क्यस्मृतिः, गणपतिशास्त्रिणा संशोधिता—T.S.S. 1921-22; second Edn. 1982, Munshiram Manoharlal Publishers Pvt. Ltd, New Delhi.)
तत्र पाठान्तरं द्रष्टव्यम्—

वक्तारो धर्मशास्त्राणां मनुर्विष्णु यमोऽङ्गिराः ।
वसिष्ठदक्षसंवर्तशातातपपराशराः ।।
आपस्तम्बोशनो व्यासाः कात्यायनबृहस्पती ।
गौतमः शङ्खलिखितौ हारीतोऽत्रि रहं तथा ।। १।५

विश्वरूपः यथार्थतया स्पष्टयति—तयेति चानुक्तोपसंग्रहार्थम् इति । विज्ञानेश्वरोऽपि—'नेयं परिसंख्या । किं तु प्रदर्शनार्थमेतत्' । अतो बौधायनादेरपि धर्मशास्त्रत्वमविरुद्धम् । इति ।

इदमिहावधेयं यत् यत्र पुनः स्मृत्यात्मक-शास्त्रयोर्विरोधः तत्र याज्ञवल्क्योक्तः निर्देशोऽनुसरणीयः । यथा—

स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः । (२।२१) इति—

अस्य श्लोकस्य व्याख्याने विज्ञानेश्वरेण प्रपञ्चितं यत् यत्र स्मृत्योः परस्परतो विरोध स्तत्र विरोधपरिहाराय विषयव्यवस्थापनादावुत्सर्गापवादादिलक्षणो व्यवहारः बलवान् समर्थः । स च न्यायः कुतः प्रत्येतव्य इत्यत आह—व्यवहारत इति । व्यवहाराद्वृद्धव्यवहारादन्वयव्यतिरेकलक्षणादवगम्यते । इति । विश्वरूपकृता बालक्रीड़ाभिधेया टीकाप्यत्र आलोचनीया यत्र बाहुल्येन विचारितं वर्त्तते यत्र च व्याख्यान्तराण्युल्लिखितानि ।

अपरार्ककृतटीकायामपि अयमेवार्थः विस्तरेणोपवर्णितः—'स्मृत्यो र्वेदमूलयोर्विरोधे ततप्रामाण्यनिर्वाहाय भिन्नविषयव्यवस्थापकोऽनुमानार्थापत्त्यात्मको न्यायोऽपेक्षणीयत्वाद्बलवान्, तस्मिन् सति स्मृतेः प्रामाण्यात्' इत्युपक्रम्य ।

स्मृतिचन्द्रिकायामपि व्याख्याप्रसङ्गतः उक्तम्—श्रुतिमूलकस्मृत्योर्विरोधे वृद्धव्यवहारावगतसावकाशनिरवकाशत्वादितर्कबलेन यथा व्यवहितविषयता तयो र्ज्ञायते तथा गृहीतव्यमित्यर्थः ।(पृः ५४-५)

एवमविरोधेऽपि न्यायावधारितशास्त्रस्यैवानुसरणं कार्य्यमित्याह **बृहस्पतिः**—

केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।
युक्तिहीने विचारे तु धर्महानिः प्रजायते ।। (१।११४)

तस्मात्तर्कानुगृहीतमेव शास्त्रार्थमाश्रित्य निर्णतव्यमित्यर्थादुक्तं भवति । गौतमनिर्देशोऽप्यत्र अनुकूलत्वेन ग्राह्यः । यथा—

न्यायाधिगमे तर्कोऽभ्युपायः । तेनाभ्यूह्य यथास्थानं गमयेत् । इति ।

न्यायाधिगमः धर्माधिगमः । स्मृत्यन्तरमतम्युपन्यस्तमत्र स्मृतिचन्द्रिकायाम्—

'यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः'—इति । (पृ: ५५) अयमेवार्थः पितामहेन विश्लिष्य प्रदर्शितः—

असत्या सत्यसंकाशाः सत्यश्चासत्यसन्निभाः ।
दृश्यन्ते भ्रान्तिजनका स्तस्माद्युक्तं परीक्षणम् ।। इति

( स्मृतिचन्द्रिकायामुल्लिखितम्, पृः, ५५)—

बार्हस्पत्यवचनमप्यनुरूपमेव—

असत्याः सत्यसदृशाः सत्याश्चासत्यसन्निभाः ।
दृश्यन्ते भ्रान्तिजनका स्तस्माद्युक्त्या विचारयेत् ।। (१।१।१७)

नारदस्मृतावपि अनुरूपाक्षरगर्भैः श्लोकैः प्रपञ्चितमिदम्—

असत्याः सत्यसङ्काशाः सत्याश्चासत्यसन्निभाः ।
दृश्यन्ते विविधा भावा स्तस्माद्युक्तं परीक्षणम् ।। (१।७१)

अन्यदपि तत्रैव—

तस्मात् प्रत्यक्षदृष्टोऽपि युक्तो ह्यर्थः परीक्षितुम् ।
परीक्ष्य ज्ञापयन्नर्थान् न धर्मात् परिहीयते ।। (१।७३)

अतएवात्र सर्वेषामुल्लिखितानां वचनानां प्रतिपाद्योऽयमर्थः यत् यद्यपि धर्मशास्त्रं व्यवहारदर्शने परमप्रमाणत्वेनाकलनीयं, तथापि सन्देहास्पदेषु तेषु तेषु स्थलेषु युक्त्युपन्यासः विधेयः येन केवलशास्त्रार्थदर्शने सम्यग्विचारहानि र्न स्यात्, क्वचित्तु सत्यस्य अप्रकाशकत्वात् ।

अष्टाङ्गानामन्यतमः खलु लेखकः । तद्गुणाः व्यासवचनमुद्धृत्य उल्लिखिताः प्रागेव । प्रासङ्गिकतया कौटिलीये अर्थशास्त्रे द्वितीयाधिकरणस्य दशमप्रकरणे शासनाधिकाराभिधे 'शासने शासनमित्याचक्षते' इत्युपक्रम्य क्रमेण लेखकमधिकृत्य यत् किञ्चिदुक्तं तदत्र समासतः निवेद्यते । सूत्रितं तत्र—'तस्मादमात्यसंपदोपेतः सर्वसमयविदाशुग्रन्थश्चार्वक्षरो लेखनवाचनसमर्थो लेखकः स्यात् ।' (२.१०.३)

लेखसंपदपि दर्शिता प्रसङ्गतः—'अर्थक्रमः संबद्धः परिपूर्णता माधुर्य्यमौदार्य्यं स्पष्टत्वमिति लेखसंपत् (२।१०।६)' इत्यभिधाय प्रत्येकशस्तेषां विहितं विश्लेषणं यथा—'तत्र यथावदनुपूर्वक्रियाप्रधानस्यार्थस्य पूर्वमभिनिवेश इत्यर्थक्रमः (२।१०।७), प्रस्तुतस्यार्थस्यानुरोधादुत्तरस्य विधानमा समाप्तेरिति संबन्धः (२।१०।८)।। अर्थपदाक्षराणामन्यूनातिरिक्तता हेतूदाहरणदृष्टान्तैरर्थोपवर्णनाश्रान्तपदतेति परिपूर्णता । (२।१०।९) । सुखोपनीतचार्वर्थशब्दाभिधानं माधुर्य्यम् (२।१०।१०) । अग्राम्यशब्दाभिधानमौदार्य्यम् (२।१०।११) । प्रतीतशब्दप्रयोगः स्पष्टत्वमिति (२।१०।१२) ।'—इत्यनेन ।

धर्मशास्त्रेषु यथा लेख्यस्य उपयोगित्वं तथा लेखकस्यापि वर्त्तते इति कृत्वा तदपि बाहुल्येन विचारणीयमिति तु लेख्यप्रकरणे उत्तरत्र अनुसन्धेयम् ।

अष्टाङ्गेषु हिरण्यस्य, अग्नेरुदकस्य चोल्लेखः नारदपादेनास्मिन् श्लोके कृतम् । तेषामुपयोगित्वं तु बृहस्पतिना प्रदर्शितम्—

'शपथार्थे हिरण्याग्नी अम्बु तृषितजन्तषु ।' (११८६) इत्यनेन ।

शपथं दिव्यञ्चाधिकृत्य नारदस्मृतौ नातिस्वल्पमालोचितं (४.२४७-२४८)—

यदा साक्षी न विद्येत विवादे वदतां नृणाम् ।
तदा दिव्यैः परीक्षेत शपथैश्च पृथग्विधैः ।। —इत्यारभ्य

तेषां तेषां निर्देशानां व्याख्यानावसरे बार्हस्पत्यवचनस्य सार्थक्यं स्फुटं भविष्यति । दिङ्मात्रमत्र निर्दिश्यते यद्भगवान् मनुः असाक्षिके व्यवहारकर्मणि शपथप्रयोगं निर्दिशति यथा—

असाक्षिकेषु त्वर्थेषु मिथो विवदमानयोः ।
अविन्दंस्तत्त्वतः सत्यं शपथेनापि लम्भयेत् ।। (८.१०६)

तदाविर्भावात् पूर्वस्मिन् कालेऽपीयं व्यवस्था शास्त्रानुमोदितासीदिति श्लोकान्तरेण प्रपञ्चितं तेन यथा—

महर्षिभिश्च देवैश्च कार्य्यार्थं शपथाः कृताः ।
वसिष्ठश्चापि शपथं शेपे पैजवने नृपे ।। (८.११०)

वसिष्ठकृत-शपथस्य उल्लेखः ऋग्वेदे संकेतितः—

अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य ।
अधा स वीरै र्दशभि वियुया यो मा मोघं यातुधानेत्याह ।। (ऋ, ७.१०४.१५)

द्रष्टव्या चापि बृहद्देवता—(६.३३-३४) ।

तत्र स्वल्पापराधे शपथस्य महापराधे च दिव्यस्य प्रयोगः निर्दिशति नारदः—

महापराधे दिव्यानि दापयेत्तु महीपतिः ।
अल्पेषु तु नृपश्रेष्टः शपथैः श्रावयेन्नरम् ।। (ना. ४.२४६)
इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणे ।
पातकेष्टाभियोगे च विधि दिव्यः प्रकीर्त्तितः ।। (४.२५०)

स्मरणीयमिदं यद् **पञ्चविंशे-ब्राह्मणे** (१४.६.६)वत्सस्य उपाख्याने अग्निदिव्यस्य प्राचीनतमः उल्लेखः उपलभ्यते—

'वत्सश्च वै मेधातिथिश्च काण्वावास्तां तं वत्सं मेधातिथिराक्रोशदब्राह्मणोऽसि शूद्रापुत्र इति । सोऽब्रवीदृतेनाग्नि व्ययाव यतरो नौ ब्रह्मीयानिति । वात्सेन वत्सो व्यैन्मैधातिथेन मेधातिथि स्तस्य न लोम च नौषत्' ।

मनुवचने च स्पष्टमिदमाख्यानं यथा—

वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा ।
नाग्नि र्ददाह रोमापि सत्येन जगतः स्पशः ।। (८.११६)

मनुना जलदिव्यस्य निर्देशोऽप्युपलभ्यते तथा अग्निदिव्यस्य—

अग्निं वाहारयेदेनमप्सु चैनं निमज्जयेत् ।
पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत् पृथक् ।। ८.११४
यमिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति च ।
न चार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः ।। ८.११५

नारदस्मृतौ अग्निदिव्यमुपजीव्यालोचनं ४-२८५-संख्यक-श्लोकादारभ्य ४।३०३ संख्यक श्लोकं यावत्, तथा जलदिव्यमुपजीव्य ४।३०४ संख्यकश्लोकतः ४।३१७ संख्यकश्लोकं यावत् सन्निवेशितम् । तद्व्याख्यानावसरे सर्वमिदं सुस्पष्टं भवेदित्यूहनीयम् । सुवर्णस्य उपयोगित्वं तु तप्तमाषात्मके दिव्ये द्रष्टव्यं यस्यालोचनं नारदस्मृतौ वर्त्तते (४।३४४-३४८ श्लोकं यावत्) ।

उदकस्य उपयोगित्वं यद् बृहस्पतिना उल्लिखितं (अम्बु तृषितजन्तुषु'-इत्यनेन-१।८६) तस्य समर्थनं स्मृत्यन्तरेषु न वा निबन्धादौ उपलभ्यते इत्यप्यत्र स्मरणीयमिति ।

दिव्यविषयकमालोचनं विशेषतः द्रष्टव्यं रघुनन्दनकृते **दिव्यतत्त्वे**, यस्यातिपाण्डित्योपेतं आङ्गलभाषयानुवादसहितं सम्पादनं विहितं—Richard W Lariviere महोदयेन—'The Divyatattva of Raghunandana Bhaṭṭāchārya, Ordeals in Classical Hindu Law, Manohar Publications, Delhi, 1981)—इति नाम्ना ।

## APPENDIX—III

Introductory Note of the *Institutes of Nārada* by Julius Jolly, Published in Calcutta, in 1885.

## PREFACE

The MSS. on which the subjoined *editio princeps* of the *Nārada-smṛiti* or *Nāradīya Dharmaśāstra* is founded may be briefly described as follows :

I, A., the text of the *Nāradasmṛiti* together with Kalyāṇabhaṭṭa's revised edition of the ancient Commentary composed by Asahāya. This MS., which was kindly lent to me by Professor Bühler, is a modern but careful transcript, in the Devanāgrī character, of a modern Deccan College MS. It extends to the 21 para of the fifth title of law only (p. 145) ; nevertheless it is by far the most valuable MS. of all, as far as it goes. In it, and its *codex archetypus,* the larger version of the *Nārada-smṛiti* has been preserved, whereas all the other MSS. that have been used for the present text contain the minor version. There can be little doubt as to the larger version being the earlier one of the two, especially as a number of *ślokas* which are attributed to Nārada in the standard Commentaries and Digests of Law are traceable to the larger version, whereas they are omitted in the minor one.[1] Other arguments showing the superior antiquity and authenticity of the larger version have been adduced in my volume of *Tagore Law Lectures,* p. 55 ; and the inference drawn from these arguments has been approved of by Professor Bühler, in the "Indian Antiquary". A. has therefore been made the foundation for the present work, as far as this MS. goes, and all deviations from it have been carefully noted in the critical foot-notes. The text, as given in A., exhibits a number of serious blunders and omissions, and the insertion of several spurious verses shows that it has been tampered with by interpolators of which Kalyāṇbhaṭṭa, the revisor of the work, may have been one. Fortunately, the copious Commentary by which the text is accompanied in A., renders it easy to discover and correct the majority of these mistakes. Further aid has been derived from the MSS. of the

---

